अयम्पि गाथा अरहत्तमेव उल्लपित्वा कथिता। अथ अजकलापको अत्तना कतेन तथारूपेनपि पटिभयरूपेन विभिंसनेन अकम्पनीयस्स भगवतो तं तादिभावं दिस्वा ''अहो अच्छरियमनुस्सोवताय''न्ति पसन्नमानसो पोथुज्जनिकाय सद्धाय अत्तनि निविट्ठभावं विभावेन्तो सत्थु सम्मुखा उपासकत्तं पवेदेसि।

सत्तमसुत्तवण्णना निट्ठिता।

८. सङ्गामजिसुत्तवण्णना

८. अट्ठमे **सङ्गामजी**ति एवंनामो। अयञ्हि आयस्मा सावत्थियं अञ्ञतरस्स महाविभवस्स सेट्ठिनो पुत्तो, वयप्पत्तकाले मातापितूहि पतिरूपेन दारेन नियोजेत्वा सापतेय्यं निय्यातेत्वा घरबन्धनेन बद्धो होति। सो एकदिवसं सावत्थिवासिनो उपासके पुब्बण्हसमयं दानं दत्वा सीलं समादियित्वा सायन्हसमये सुद्धवत्थे सुद्धुत्तरासङ्गे गन्धमालादिहत्थे धम्मस्सवनत्थं जेतवनाभिमुखे गच्छन्ते दिस्वा ''कत्थ तुम्हे गच्छथा''ति पुच्छित्वा ''धम्मस्सवनत्थं जेतवने सत्थु सन्तिक''न्ति वुत्ते ''तेन हि अहम्पि गमिस्सामी''ति तेहि सद्धिं जेतवनं अगमासि। तेन च समयेन भगवा कञ्चनगुहायं सीहनादं नदन्तो केसरसीहो विय सद्धम्ममण्डपे पञ्ञत्तवरबुद्धासने निसीदित्वा चतुपरिसमज्झे धम्मं देसेति।

अथ खो ते उपासका भगवन्तं वन्दित्वा एकमन्तं निसीदिंसु, सङ्गामजिपि कुलपुत्तो तस्सा परिसाय परियन्ते धम्मं सुणन्तो निसीदि। भगवा अनुपुब्बिकथं कथेत्वा चत्तारि सच्चानि पकासेसि, सच्चपरियोसाने अनेकेसं पाणसहस्सानं धम्माभिसमयो अहोसि। सङ्गामजिपि कुलपुत्तो सोतापत्तिफलं पत्वा परिसाय वुट्ठिताय भगवन्तं उपसङ्कमित्वा वन्दित्वा पब्बज्जं याचि ''पब्बाजेथ मं भगवा''ति। ''अनुञ्ञातोसि पन त्वं मातापितूहि पब्बज्जाया''ति? ''नाहं, भन्ते, अनुञ्ञातो''ति। ''न खो, सङ्गामजि, तथागता मातापितूहि अननुञ्ञातं पुत्तं पब्बाजेन्ती''ति। ''सोहं, भन्ते, तथा करिस्सामि, यथा मं मातापितरो पब्बजितुं अनुजानन्ती''ति। सो भगवन्तं वन्दित्वा पदक्खिणं कत्वा मातापितरो उपसङ्कमित्वा, ''अम्मताता, अनुजानाथ मं पब्बजितु''न्ति आह। ततो परं रट्ठपालसुत्ते (म॰ नि॰ २.२९३ आदयो)

आगतनयेन वेदितब्बं।

अथ सो ''पब्बजित्वा अत्तानं दस्सेस्सामी''ति पटिञ्ञं दत्वा अनुञ्ञातो मातापितूहि भगवन्तं उपसङ्कमित्वा पब्बज्जं याचि। अलत्थ खो च भगवतो सन्तिके पब्बज्जं उपसम्पदञ्च, अचिरूपसम्पन्नो च पन सो उपरिमग्गत्थाय घटेन्तो वायमन्तो अञ्ञतरस्मिं अरञ्ञावासे वस्सं वसित्वा छळभिञ्ञो हुत्वा वुत्थवस्सो भगवन्तं दस्सनाय मातापितूनञ्च पटिस्सवमोचनत्थं सावत्थिं अगमासि। तेन वुत्तं – **''तेन खो पन समयेन आयस्मा सङ्गामजि सावत्थिं अनुप्पत्तो होती**''ति।

सो हायस्मा धुरगामे पिण्डाय चरित्वा पच्छाभत्तं पिण्डपातपटिक्कन्तो जेतवनं पविसित्वा भगवन्तं उपसङ्कमित्वा भगवता सद्धिं कतपटिसन्थारो अञ्ञं ब्याकरित्वा पुन भगवन्तं वन्दित्वा पदक्खिणं कत्वा निक्खमित्वा अञ्ञतरस्मिं रुक्खमूले दिवाविहारं निसीदि। अथस्स मातापितरो ञातिमित्ता चस्स आगमनं सुत्वा, ''सङ्गामजि, किर इधागतो''ति हट्ठतुट्ठा तुरिततुरिता विहारं गन्त्वा परियेसन्ता नं तत्थ निसिन्नं दिस्वा उपसङ्कमित्वा पटिसन्थारं कत्वा ''मा अपुत्तकं सापतेय्यं राजानो हरेय्युं, अप्पिया दायादा वा गण्हेय्युं, नालं पब्बज्जाय, एहि, तात, विब्भमा''ति याचिंसु। तं सुत्वा थेरो ''इमे मय्हं कामेहि अनत्थिकभावं न जानन्ति, गूथधारी विय गूथपिण्डे कामेसुयेव अल्लीयनं इच्छन्ति, नयिमे सक्का धम्मकथाय सञ्ञापेतु''न्ति अस्सुणन्तो विय निसीदि। ते नानप्पकारं याचित्वा अत्तनो वचनं अग्गण्हन्तं दिस्वा घरं पविसित्वा पुत्तेन सद्धिं तस्स भरियं सपरिवारं उय्योजेसुं ''मयं नानप्पकारं तं याचन्तापि तस्स मनं अलभित्वा आगता, गच्छ त्वं, भद्दे, तव भत्तारं पुत्तसन्दस्सनेन याचित्वा सञ्ञापेही''ति। ताय किर आपन्नसत्ताय अयमायस्मा पब्बजितो। सा ''साधू''ति सम्पटिच्छित्वा दारकमादाय महता परिवारेन जेतवनं अगमासि। तं सन्धाय वुत्तं – **''अस्सोसि खो आयस्मतो सङ्गामजिस्सा**''तिआदि।

तत्थ **पुराणदुतियिका**ति पुब्बे गिहिकाले पादपरिचरणवसेन दुतियिका, भरियाति अत्थो। **अय्यो**ति ''अय्यपुत्तो''ति वत्तब्बे पब्बजितानं अनुच्छविकवोहारेन वदति। **किरा**ति अनुस्सवनत्थे निपातो, तस्स अनुप्पत्तो किराति सम्बन्धो वेदितब्बो। **खुद्दपुत्तम्हि समण, पोस म**न्ति आपन्नसत्तमेव मं छड्डेत्वा पब्बजितो, साहं एतरहि खुद्दपुत्ता, तादिसं मं छड्डेत्वाव तव समणधम्मकरणं अयुत्तं, तस्मा, समण, पुत्तदुतियं मं घासच्छादनादीहि भरस्सूति। आयस्मा पन, सङ्गामजि, इन्द्रियानि उक्खिपित्वा तं नेव ओलोकेति, नापि आलपति। तेन वुत्तं – **''एवं वुत्ते आयस्मा सङ्गामजि तुण्ही अहोसी**''ति।

सा तिक्खत्तुं तथेव वत्वा तुण्हीभूतमेव तं दिस्वा ''पुरिसा नाम भरियासु निरपेक्खापि पुत्तेसु सापेक्खा होन्ति, पुत्तसिनेहो पितु अट्ठिमिञ्जं आहच्च तिट्ठति, तस्मा पुत्तपेमेनापि मय्हं वसे वत्तेय्या''ति मञ्ञमाना पुत्तं थेरस्स अङ्के निक्खिपित्वा एकमन्तं अपक्कम्म **''एसो ते, समण, पुत्तो, पोस न**''न्ति वत्वा थोकं अगमासि। सा किर समणतेजेनस्स सम्मुखे ठातुं नासक्खि। थेरो दारकम्पि नेव ओलोकेति नापि आलपति। अथ सा इत्थी अविदूरे ठत्वा मुखं परिवत्तेत्वा ओलोकेन्ती थेरस्स आकारं ञत्वा पटिनिवत्तित्वा ''पुत्तेनपि अयं समणो अनत्थिको''ति दारकं गहेत्वा पक्कामि। तेन वुत्तं – **''अथ खो आयस्मतो सङ्गामजिस्स पुराणदुतियिका**''तिआदि।

तत्थ **पुत्तेनपी**ति अयं समणो अत्तनो ओरसपुत्तेनपि अनत्थिको, पगेव अञ्ञेहीति अधिप्पायो। **दिब्बेना**ति एत्थ दिब्बसदिसत्ता दिब्बं। देवतानञ्हि सुचरितकम्मनिब्बत्तं पित्तसेम्हरुहिरादीहि अपलिबुद्धं दूरेपि आरम्मणसम्पटिच्छनसमत्थं दिब्बं पसादचक्खु होति। इदम्पि चतुत्थज्झानसमाधिनिब्बत्तं अभिञ्ञाचक्खुं तादिसन्ति दिब्बं वियाति दिब्बं,

दिब्बविहारसन्निस्सयेन लद्धत्ता वा दिब्बं, महाजुतिकत्ता महागतिकत्ता वा दिब्बं, तेन दिब्बेन। **विसुद्धेना**ति नीवरणादिसंकिलेसविगमेन सुपरिसुद्धेन। **अतिक्कन्तमानुसकेना**ति मनुस्सानं विसयातीतेन। **इमं एवरूपं विप्पकार**न्ति इमं एवं विप्पकारं यथावुत्तं पब्बजितेसु असारुप्पं अङ्के पुत्तट्ठपनसङ्खातं विरूपकिरियं।

एतमत्थन्ति एतं आयस्मतो सङ्गामजिस्स पुत्तदारादीसु सब्बत्थ निरपेक्खभावसङ्खातं अत्थं सब्बाकारतो विदित्वा। **इमं उदान**न्ति इमं तस्स इट्ठानिट्ठादीसु तादिभावदीपकं उदानं उदानेसि।

तत्थ **आयन्ति**न्ति आगच्छन्तिं, पुराणदुतियिकन्ति अधिप्पायो। **नाभिनन्दती**ति दट्ठुं मं आगताति न नन्दति न तुस्सति। **पक्कमन्ति**न्ति सा अयं मया असम्मोदिताव गच्छतीति गच्छन्तिं। **न सोचती**ति न चित्तसन्तापमापज्जति। येन पन कारणेन थेरो एवं नाभिनन्दति न सोचति, तं दस्सेतुं ''**सङ्गा सङ्गामजिं मुत्त**''न्ति वुत्तं। तत्थ **सङ्गा**ति रागसङ्गो दोसमोहमानदिट्ठिसङ्गोति पञ्चविधापि सङ्गा समुच्छेदप्पटिपस्सद्धिविमुत्तीहि विमुत्तं सङ्गामजिं भिक्खुं। **तमहं ब्रूमि ब्राह्मण**न्ति तं तादिभावप्पत्तं खीणासवं अहं सब्बसो बाहितपापत्ता ब्राह्मणन्ति वदामीति।

अट्ठमसुत्तवण्णना निट्ठिता।

९. जटिलसुत्तवण्णना

९. नवमे **गयाय**न्ति एत्थ **गया**ति गामोपि तित्थम्पि वुच्चति। गयागामस्स हि अविदूरे विहरन्तो भगवा ''गयायं विहरती''ति वुच्चति, तथा गयातित्थस्स। गयातित्थन्ति हि गयागामस्स अविदूरे एका पोक्खरणी अत्थि नदीपि, तदुभयं ''पापपवाहनतित्थ''न्ति लोकियमहाजनो समुदाचरति। **गयासीसे**ति गजसीससदिससिखरो तत्थ एको पब्बतो गयासीसनामको, यत्थ हत्थिकुम्भसदिसो पिट्ठिपासाणो भिक्खुसहस्सस्स ओकासो पहोति, तत्र भगवा विहरति। तेन वुत्तं – ''**गयायं विहरति गयासीसे**''ति।

जटिलाति तापसा। ते हि जटाधारिताय इध ''जटिला''ति वुत्ता। **अन्तरट्ठके हिमपातसमये**ति हेमन्तस्स उतुनो अब्भन्तरभूते माघमासस्स अवसाने चत्तारो फग्गुणमासस्स आदिम्हि चत्तारोति अट्ठदिवसपरिमाणे हिमस्स पतनकाले। **गयायं उम्मुज्जन्ती**ति केचि तस्मिं तित्थसम्मते उदके पठमं निमुग्गसकलसरीरा ततो उम्मुज्जन्ति वुट्ठहन्ति उप्पिलवन्ति। **निमुज्जन्ती**ति ससीसं उदके ओसीदन्ति। **उम्मुज्जनिमुज्जम्पि करोन्ती**ति पुनप्पुनं उम्मुज्जननिमुज्जनानिपि करोन्ति।

तत्थ हि केचि ''एकुम्मुज्जनेनेव पापसुद्धि होती''ति एवंदिट्ठिका, ते उम्मुज्जनमेव कत्वा गच्छन्ति। उम्मुज्जनं पन निमुज्जनमन्तरेन नत्थीति अविनाभावतो निमुज्जनम्पि ते करोन्तियेव। येपि ''एकनिमुज्जनेनेव पापसुद्धि होती''ति एवंदिट्ठिका, तेपि एकवारमेव निमुज्जित्वा वुत्तनयेन अविनाभावतो उम्मुज्जनम्पि कत्वा पक्कमन्ति। ये पन ''तस्मिं तित्थे निमुज्जनेनेव पापसुद्धि होती''ति एवंदिट्ठिका, ते तत्थ निमुज्जित्वा अस्सासे सन्निरुम्भित्वा मरुप्पातपतिता विय तत्थेव जीवितक्खयं पापुणन्ति। अपरे ''पुनप्पुनं उम्मुज्जननिमुज्जनानि कत्वा न्हाते पापसुद्धि होती''ति एवंदिट्ठिका, ते कालेन कालं उम्मुज्जननिमुज्जनानि करोन्ति। ते सब्बेपि सन्धाय वुत्तं – ''**उम्मुज्जन्तिपि निमुज्जन्तिपि उम्मुज्जनिमुज्जम्पि करोन्ती''ति।** एत्थ च किञ्चापि निमुज्जनपुब्बकं उम्मुज्जनं, निमुज्जनमेव पन करोन्ता कतिपया, उम्मुज्जनं तदुभयञ्च करोन्ता बहूति तेसं येभुय्यभावदस्सनत्थं उम्मुज्जनं पठमं वुत्तं। तथा **सम्बहुला जटिला**ति जटिलानं येभुय्यताय वुत्तं, मुण्डसिखण्डिनोपि च ब्राह्मणा उदकसुद्धिका तस्मिं काले तत्थ तथा करोन्ति।

ओसिञ्चन्तीति केचि गयाय उदकं हत्थेन गहेत्वा अत्तनो सीसे च सरीरे च ओसिञ्चन्ति, अपरे घटेहि उदकं गहेत्वा तीरे ठत्वा तथा करोन्ति। **अग्गिं जुहन्ती**ति केचि गयातीरे वेदिं सज्जेत्वा धूमदब्भिपूजादिके उपकरणे उपनेत्वा अग्गिहुतं जुहन्ति अग्गिहुतं परिचरन्ति। **इमिना सुद्धी**ति इमिना गयायं उम्मुज्जनादिना अग्गिपरिचरणेन च पापमलतो सुद्धि पापपवाहना संसारसुद्धि एव वा होतीति एवंदिट्ठिका हुत्वाति अत्थो।

उम्मुज्जनादि चेत्थ निदस्सनमत्तं वुत्तन्ति दट्ठब्बं। तेसु हि केचि उदकवासं वसन्ति, केचि उदकस्सञ्जलिं देन्ति, केचि तस्मिं उदके ठत्वा चन्दिमसूरिये अनुपरिवत्तन्ति, केचि अनेकसहस्सवारं सावित्तिआदिके जपन्ति, केचि ''इन्द आगच्छा''तिआदिना विज्जाजपं अव्हायन्ति, केचि महतुपट्ठानं करोन्ति, एवञ्च करोन्ता केचि ओतरन्ति, केचि उत्तरन्ति केचि उत्तरित्वा सुद्धिकआचमनं करोन्ति, केचि अन्तोउदके ठिता तन्ती वादेन्ति, वीणं वादेन्तीति एवमादिका नानप्पकारकिरिया दस्सेन्ति। यस्मा वा ते एवरूपा विकारकिरिया करोन्तापि तस्मिं उदके निमुज्जनउम्मुज्जनपुब्बकमेव करोन्ति, तस्मा तं सब्बं निमुज्जनुम्मुज्जनन्तोगधमेव कत्वा ''उम्मुज्जन्ती''तिपिआदि वुत्तं। एवं तत्थ आकुलब्याकुले वत्तमाने उपरिपब्बते ठितो भगवा तेसं तं कोलाहलं सुत्वा ''किन्नु खो एत''न्ति ओलोकेन्तो तं किरियविकारं अद्दस, तं सन्धाय वुत्तं – **''अद्दसा खो भगवा…पे॰… इमिना सुद्धी''**ति, तं वुत्तत्थमेव।

एतमत्थं विदित्वाति एतं अत्थं उदकोरोहनादिअसुद्धिमग्गे तेसं सुद्धिमग्गपरामसनं सच्चादिके च सुद्धिमग्गे अत्तनो अविपरीतावबोधं सब्बाकारतो विदित्वा। **इमं उदान**न्ति इमं उदकसुद्धिया असुद्धिमग्गभावदीपकं सच्चादिधम्मानञ्च याथावतो सुद्धिमग्गभावदीपकं उदानं उदानेसि।

तत्थ **न उदकेन सुची होती**ति एत्थ **उदकेना**ति उदकुम्मुज्जनादिना। उदकुम्मुज्जनादि हि इध उत्तरपदलोपेन ''उदक''न्ति वुत्तं यथा रूपभवो रूपन्ति। अथ वा **उदकेना**ति उम्मुज्जनादिकिरियाय साधनभूतेन उदकेन सुचि सत्तस्स सुद्धि नाम न होति, नत्थीति अत्थो। अथ वा **सुची**ति तेन यथावुत्तेन उदकेन सुचि पापमलतो सुद्धो नाम सत्तो न होति। कस्मा? **बह्वेत्थ न्हायती जनो**। यदि हि उदकोरोहनादिना यथावुत्तेन पापसुद्धि नाम सिया, बहु एत्थ उदके जनो न्हायति, मातुघातादिपापकम्मकारी अञ्ञो च गोमहिंसादिको अन्तमसो मच्छकच्छपे उपादाय, तस्स सब्बस्सापि पापसुद्धि सिया, न पनेवं होति। कस्मा? न्हानस्स पापहेतूनं अप्पटिपक्खभावतो। यञ्हि यं विनासेति, सो तस्स पटिपक्खो यथा आलोको अन्धकारस्स, विज्जा च अविज्जाय, न एवं न्हानं पापस्स। तस्मा निट्ठमेत्थ गन्तब्बं ''न उदकेन सुचि होती''ति।

येन पन सुचि होति, तं दस्सेतुं **''यम्हि सच्चञ्चा''**तिआदिमाह। तत्थ **यम्ही**ति यस्मिं पुग्गले। **सच्च**न्ति वचीसच्चञ्चेव विरतिसच्चञ्च। अथ वा सच्चन्ति ञाणसच्चञ्चेव परमत्थसच्चञ्च। **धम्मो**ति अरियमग्गधम्मो, फलधम्मो च, सो सब्बोपि यस्मिं पुग्गले उपलब्भति, **सो सुची सो च ब्राह्मणो**ति सो अरियपुग्गलो विसेसतो खीणासवो अच्चन्तसुद्धिया सुचि च ब्राह्मणो चाति। कस्मा पनेत्थ सच्चं धम्मतो विसुं कत्वा गहितं? सच्चस्स बहूपकारत्ता। तथा हि ''सच्चं वे अमता वाचा (सु॰ नि॰ ४५५), सच्चं हवे सादुतरं रसानं (सं॰ नि॰ १.२४६; सु॰ नि॰ १८४), सच्चे अत्थे च धम्मे च, आहु सन्तो पतिट्ठिता (सु॰ नि॰ ४५५), सच्चे ठिता समणब्राह्मणा चा''तिआदिना (जा॰ २.२१.४३३) अनेकेसु सुत्तपदेसु सच्चगुणा पकासिता। सच्चविपरियस्स च ''एकं धम्मं अतीतस्स, मुसावादिस्स जन्तुनो (ध॰ प॰ १७६), अभूतवादी निरयं उपेती''ति (ध॰ प॰ ३०६) च आदिना पकासिताति।

नवमसुत्तवण्णना निट्ठिता।

१०. बाहियसुत्तवण्णना

१०. दसमे **बाहियो**ति तस्स नामं। **दारुचीरियो**ति दारुमयचीरो। **सुप्पारके**ति एवंनामके पट्टने वसति। को पनायं बाहियो, कथञ्च दारुचीरियो अहोसि, कथं सुप्पारके पट्टने पटिवसतीति?

तत्रायं अनुपुब्बीकथा – इतो किर कप्पसतसहस्समत्थके पदुमुत्तरसम्मासम्बुद्धकाले एको कुलपुत्तो हंसवतीनगरे दसबलस्स धम्मदेसनं सुणन्तो सत्थारं एकं भिक्खुं खिप्पाभिञ्ञानं एतदग्गे ठपेन्तं दिस्वा ''महा वतायं भिक्खु, यो सत्थारा एवं एतदग्गे ठपीयति, अहो वताहम्पि अनागते एवरूपस्स सम्मासम्बुद्धस्स सासने पब्बजित्वा सत्थारा एदिसे ठाने एतदग्गे ठपेतब्बो भवेय्यं यथायं भिक्खू''ति तं ठानन्तरं पत्थेत्वा तदनुरूपं अधिकारकम्मं कत्वा यावजीवं पुञ्ञं कत्वा सग्गपरायणो हुत्वा देवमनुस्सेसु संसरन्तो कस्सपदसबलस्स सासने पब्बजित्वा परिपुण्णसीलो समणधम्मं करोन्तोव जीवितक्खयं पत्वा देवलोके निब्बत्ति। सो एकं बुद्धन्तरं देवलोके वसित्वा इमस्मिं बुद्धुप्पादे बाहियरट्ठे कुलगेहे पटिसन्धिं गण्हि, तं बाहियरट्ठे जातत्ता **बाहियो**ति सञ्जानिंसु। सो वयप्पत्तो घरावासं वसन्तो वणिज्जत्थाय बहूनं भण्डानं नावं पूरेत्वा समुद्दं पविसित्वा अपरापरं सञ्चरन्तो सत्त वारे सद्धिंयेव परिसाय अत्तनो नगरं उपगच्छि।

अट्ठमे वारे पन ''सुवण्णभूमिं गमिस्सामी''ति आरोपितभण्डो नावं अभिरुहि। नावा महासमुद्दं अज्झोगाहेत्वा इच्छितदेसं अपत्वाव समुद्दमज्झे विपन्ना। महाजनो मच्छकच्छपभक्खो अहोसि। बाहियो पन एकं नावाफलकं गहेत्वा तरन्तो ऊमिवेगेन मन्दमन्दं खिपमानो भस्सित्वा समुद्दे पतितत्ता जातरूपेनेव समुद्दतीरे निपन्नो। परिस्समं विनोदेत्वा अस्सासमत्तं लभित्वा उट्ठाय लज्जाय गुम्बन्तरं पविसित्वा अच्छादनं अञ्ञं किञ्चि अपस्सन्तो अक्कनाळानि छिन्दित्वा वाकेहि पलिवेठेत्वा निवासनपावुरणानि कत्वा अच्छादेसि। केचि पन ''दारुफलकानि विज्झित्वा वाकेन आवुणित्वा निवासनपावुरणं कत्वा अच्छादेसी''ति वदन्ति। एवं सब्बथापि दारुमयचीरधारिताय **''दारुचीरियो''**ति पुरिमवोहारेन **''बाहियो''**ति च पञ्ञायित्थ।

तं एकं कपालं गहेत्वा वुत्तनियामेन सुप्पारकपट्टने पिण्डाय चरन्तं दिस्वा मनुस्सा चिन्तेसुं ''सचे लोके अरहन्तो नाम होन्ति, एवंविधेहि भवितब्बं, किन्नु खो अयं अय्यो वत्थं दिय्यमानं गण्हेय्य, उदाहु अप्पिच्छताय न गण्हेय्या''ति वीमंसन्ता नानादिसाहि वत्थानि उपनेसुं। सो चिन्तेसि – ''सचाहं इमिना नियामेन नागमिस्सं, नयिमे एवं मयि पसीदेय्युं, यंनूनाहं इमानि पटिक्खिपित्वा इमिनाव नीहारेन विहरेय्यं, एवं मे लाभसक्कारो उप्पज्जिस्सती''ति। सो एवं चिन्तेत्वा कोहञ्ञे ठत्वा वत्थानि न पटिग्गण्हि। मनुस्सा ''अहो अप्पिच्छो वतायं अय्यो''ति भिय्योसोमत्ताय पसन्नमानसा महन्तं सक्कारसम्मानं करिंसु।

सोपि भत्तकिच्चं कत्वा अविदूरट्ठाने एकं देवायतनं अगमासि। महाजनो तेन सद्धिं एव गन्त्वा तं देवायतनं पटिजग्गित्वा अदासि। सो ''इमे मय्हं चीरधारणमत्ते पसीदित्वा एवंविधं सक्कारसम्मानं करोन्ति, एतेसं मया उक्कट्ठवुत्तिना भवितुं वट्टती''ति सल्लहुकपरिक्खारो अप्पिच्छोव हुत्वा विहासि। ''अरहा''ति पन तेहि सम्भावीयमानो ''अरहा''ति अत्तानं अमञ्ञि, उपरूपरि चस्स सक्कारगरुकारो अभिवड्ढि, लाभी च अहोसि उळारानं पच्चयानं। तेन वुत्तं – **''तेन खो पन समयेन बाहियो दारुचीरियो सुप्पारके पटिवसति समुद्दतीरे सक्कतो गरुकतो''**तिआदि।

तत्थ **सक्कतो**ति सक्कच्चं आदरेन उपट्ठानवसेन सक्कतो। **गरुकतो**ति गुणविसेसेन युत्तोति अधिप्पायेन पासाणच्छत्तं विय गरुकरणवसेन गरुकतो। **मानितो**ति मनसा सम्भावनवसेन मानितो। **पूजितो**ति पुप्फगन्धादीहि

पूजावसेन पूजितो। **अपचितो**ति अभिप्पसन्नचित्तेहि मग्गदानआसनाभिहरणादिवसेन अपचितो। **लाभी चीवर... पे०... परिक्खारान**न्ति पणीतपणीतानं उपरूपरि उपनीयमानानं चीवरादीनं चतुन्नं पच्चयानं लभनवसेन लाभी।

अपरो नयो – **सक्कतो**ति सक्कारप्पत्तो। **गरुकतो**ति गरुकारप्पत्तो। **मानितो**ति बहुमानितो मनसा पियायितो च। **पूजितो**ति चतुपच्चयाभिपूजाय पूजितो। **अपचितो**ति अपचायनप्पत्तो। यस्स हि चत्तारो पच्चये सक्कत्वा सुअभिसङ्खते पणीतपणीते देन्ति, सो **सक्कतो**। यस्मिं गरुभावं पच्चुपट्ठपेत्वा देन्ति, सो **गरुकतो**। यं मनसा पियायन्ति बहुमञ्ञन्ति च, सो **मानितो**। यस्स सब्बम्पेतं पूजनवसेन करोन्ति, सो **पूजितो**। यस्स अभिवादनपच्चुट्ठानञ्जलिकम्मादिवसेन परमनिपच्चकारं करोन्ति, सो **अपचितो**। बाहियस्स पन ते सब्बमेतं अकंसु। तेन वुत्तं – ''बाहियो दारुचीरियो सुप्पारके पटिवसति सक्कतो''तिआदि। एत्थ च चीवरं सो अग्गण्हन्तोपि ''एहि, भन्ते, इमं वत्थं पटिग्गण्हाही''ति उपनामनवसेन चीवरस्सापि ''लाभी''त्वेव वुत्तो।

रहोगतस्साति रहसि गतस्स। **पटिसल्लीनस्सा**ति एकीभूतस्स बहूहि मनुस्सेहि ''अरहा''ति वुच्चमानस्स तस्स इदानि वुच्चमानाकारेन **चेतसो परिवितक्को उदपादि** चित्तस्स मिच्छासङ्कप्पो उप्पज्जि। कथं? **ये खो केचि लोके अरहन्तो वा अरहत्तमग्गं वा समापन्ना, अहं तेसं अञ्ञतरो**ति। तस्सत्थो – ये इमस्मिं सत्तलोके किलेसारीनं हतत्ता पूजासक्कारादीनञ्च अरहभावेन अरहन्तो, ये किलेसारीनं हननेन अरहत्तमग्गं समापन्ना, तेसु अहं एकोति।

पुराणसालोहिताति पुरिमस्मिं भवेसालोहिता बन्धुसदिसा एकतो कतसमणधम्मा देवता। केचि पन ''पुराणसालोहिताति पुराणकाले भवन्तरे सालोहिता मातुभूता एका देवता''ति वदन्ति, तं अट्ठकथायं पटिक्खिपित्वा पुरिमोयेवत्थो गहितो।

पुब्बे किर कस्सपदसबलस्स सासने ओसक्कमाने सामणेरादीनं विप्पकारं दिस्वा सत्त भिक्खू संवेगप्पत्ता ''याव सासनं न अन्तरधायति, ताव अत्तनो पतिट्ठं करिस्सामा''ति सुवण्णचेतियं वन्दित्वा अरञ्ञं पविट्ठा एकं पब्बतं दिस्वा ''जीविते सालया निवत्तन्तु, निरालया इमं पब्बतं अभिरुहन्तू''ति वत्वा निस्सेणिं बन्धित्वा सब्बे तं पब्बतं अभिरुय्ह निस्सेणिं पातेत्वा समणधम्मं करिंसु। तेसु सङ्घत्थेरो एकरत्तातिक्कमेनेव अरहत्तं पापुणि। सो उत्तरकुरुतो पिण्डपातं आनेत्वा ते भिक्खू, ''आवुसो, इतो पिण्डपातं परिभुञ्जथा''ति आह। ते ''तुम्हे, भन्ते, अत्तनो आनुभावेन एवं अकत्थ, मयम्पि सचे तुम्हे विय विसेसं निब्बत्तेस्साम, सयमेव आहरित्वा भुञ्जिस्सामा''ति भुञ्जितुं न इच्छिंसु। ततो दुतियदिवसे दुतियत्थेरो अनागामिफलं पापुणि, सोपि तथेव पिण्डपातं आदाय तत्थ गन्त्वा इतरे निमन्तेसि, तेपि तथेव पटिक्खिपिंसु। तेसु अरहत्तप्पत्तो परिनिब्बायि, अनागामी सुद्धावासभूमियं निब्बत्ति। इतरे पन पञ्च जना घटेन्ता वायमन्तापि विसेसं निब्बत्तेतुं नासक्खिंसु। ते असक्कोन्ता तत्थेव परिसुस्सित्वा देवलोके निब्बत्ता। एकं बुद्धन्तरं देवेसुयेव संसरित्वा इमस्मिं बुद्धुप्पादे देवलोकतो चवित्वा तत्थ तत्थ कुलघरे निब्बत्तिंसु। तेसु हि एको पक्कुसाति राजा अहोसि, एको कुमारकस्सपो, एको दब्बो मल्लपुत्तो, एको सभियो परिब्बाजको, एको बाहियो दारुचीरियो। तत्थ यो सो अनागामी ब्रह्मलोके निब्बत्तो, तं सन्धायेतं वुत्तं ''पुराणसालोहिता देवता''ति। देवपुत्तोपि हि देवधीता विय देवो एव देवताति कत्वा देवताति वुच्चति ''अथ खो अञ्ञतरा देवता''तिआदीसु विय। इध पन ब्रह्मा देवताति अधिप्पेतो।

तस्स हि ब्रह्मुनो तत्थ निब्बत्तसमनन्तरमेव अत्तनो ब्रह्मसम्पत्तिं ओलोकेत्वा आगतट्ठानं आवज्जेन्तस्स सत्तन्नं जनानं पब्बतं आरुय्ह समणधम्मकरणं, तत्थेकस्स परिनिब्बुतभावो, अनागामिफलं पत्वा अत्तनो च एत्थ निब्बत्तभावो उपट्ठासि। सो ''कत्थ नु खो इतरे पञ्च जना''ति आवज्जेन्तो कामावचरदेवलोके तेसं निब्बत्तभावं ञत्वा अपरभागे कालानुकालं

''किन्नु खो करोन्ती''ति तेसं पवत्तिं ओलोकेतियेव। इमस्मिं पन काले ''कहं नु खो''ति आवज्जेन्तो बाहियं सुप्पारकपट्टनं उपनिस्साय दारुचीरधारिं कोहञ्ञेन जीविकं कप्पेन्तं दिस्वा ''अयं मया सद्धिं पुब्बे निस्सेणिं बन्धित्वा पब्बतं अभिरुहित्वा समणधम्मं करोन्तो अतिसल्लेखवुत्तिया जीविते अनपेक्खो अरहतापि आभतं पिण्डपातं अपरिभुञ्जित्वा इदानि सम्भावनाधिप्पायो अनरहाव अरहत्तं पटिजानित्वा विचरति लाभसक्कारसिलोकं निकामयमानो, दसबलस्स च निब्बत्तभावं न जानाति, हन्द नं संवेजेत्वा बुद्धुप्पादं जानापेस्सामी''ति तावदेव ब्रह्मलोकतो ओतरित्वा रत्तिभागे सुप्पारकपट्टने दारुचीरियस्स सम्मुखे पातुरहोसि। बाहियो अत्तनो वसनट्ठाने उळारं ओभासं दिस्वा ''किं नु खो एत''न्ति बहि निक्खमित्वा ओलोकेन्तो आकासे ठितं महाब्रह्मानं दिस्वा अञ्जलिं पग्गय्ह ''के तुम्हे''ति पुच्छि। अथस्स सो ब्रह्मा ''अहं ते पोराणकसहायो तदा अनागामिफलं पत्वा ब्रह्मलोके निब्बत्तो, त्वं पन किञ्चि विसेसं निब्बत्तेतुं असक्कोन्तो तदा पुथुज्जनकालकिरियं कत्वा संसरन्तो इदानि तित्थियवेसधारी अनरहाव समानो 'अरहा अह'न्ति इमं लद्धिं गहेत्वा विचरसीति ञत्वा आगतो, नेव खो त्वं, बाहिय, अरहा, पटिनिस्सज्जेतं पापकं दिट्ठिगतं, मा ते अहोसि दीघरत्तं अहिताय दुक्खाय, सम्मासम्बुद्धो लोके उप्पन्नो। सो हि भगवा अरहा, गच्छ नं पयिरुपासस्सू''ति आह। तेन वुत्तं – **''अथ खो बाहियस्स दारुचीरियस्स पुराणसालोहिता देवता''**तिआदि।

तत्थ **अनुकम्पिका**ति अनुग्गहसीला करुणाधिका। **अत्थकामा**ति हितकामा मेत्ताधिका। पुरिमपदेन चेत्थ बाहियस्स दुक्खापनयनकामतं तस्सा देवताय दस्सेति, पच्छिमेन हितूपसंहारं। **चेतसा**ति अत्तनो चित्तेन, चेतोसीसेन चेत्थ चेतोपरियञाणं गहितन्ति वेदितब्बं। **चेतोपरिवितक्क**न्ति तस्स चित्तप्पवत्तिं। **अञ्ञाया**ति जानित्वा। **तेनुपसङ्कमी**ति सेय्यथापि नाम बलवा पुरिसो समिञ्जितं वा बाहं पसारेय्य, पसारितं वा बाहं समिञ्जेय्य, एवमेव ब्रह्मलोके अन्तरहितो बाहियस्स पुरतो पातुभवनवसेन उपसङ्कमि। **एतदवोचा**ति ''ये खो केचि लोके अरहन्तो वा''तिआदिपवत्तमिच्छापरिवितक्कं बाहियं सहोढं चोरं गण्हन्तो विय ''नेव खो त्वं, बाहिय, अरहा''तिआदिकं एतं इदानि वुच्चमानवचनं ब्रह्मा अवोच। **नेव खो त्वं, बाहिय, अरहा**ति एतेन तदा बाहियस्स असेक्खभावं पटिक्खिपति, **नापि अरहत्तमग्गं वा समापन्नो**ति एतेन सेक्खभावं, उभयेनपिस्स अनरियभावमेव दीपेति। **सापि ते पटिपदा नत्थि, याय त्वं अरहा वा अस्स अरहत्तमग्गं वा समापन्नो**ति इमिना पनस्स कल्याणपुथुज्जनभावम्पि पटिक्खिपति। तत्थ **पटिपदा**ति सीलविसुद्धिआदयो छ विसुद्धियो। पटिपज्जति एताय अरियमग्गोति पटिपदा। **अस्सा**ति भवेय्यासि।

अयञ्चस्स अरहत्ताधिमानो किं निस्साय उप्पन्नोति? ''अप्पिच्छताय सन्तुट्ठिताय सल्लेखताय दीघरत्तं कताधिकारत्ता तदङ्गप्पहानवसेन किलेसानं विहतत्ता अरहत्ताधिमानो उप्पन्नो''ति केचि वदन्ति। अपरे पनाहु ''बाहियो पठमादिझानचतुक्कलाभी, तस्मास्स विक्खम्भनप्पहानेन किलेसानं असमुदाचारतो अरहत्ताधिमानो उप्पज्जती''ति। तदुभयम्पि तेसं मतिमत्तमेव ''सम्भावनाधिप्पायो लाभसक्कारसिलोकं निकामयमानो''ति च अट्ठकथायं आगतत्ता। तस्मा वुत्तनयेनेवेत्थ अत्थो वेदितब्बो।

अथ बाहियो आकासे ठत्वा कथेन्तं महाब्रह्मानं ओलोकेत्वा चिन्तेसि – ''अहो भारियं वत कम्मं, यमहं अरहाति चिन्तेसिं, अयञ्च 'अरहत्तगामिनी पटिपदापि ते नत्थी'ति वदति, अत्थि नु खो लोके कोचि अरहा''ति? अथ नं पुच्छि। तेन वुत्तं – **''अथ के चरहि देवते लोके अरहन्तो वा अरहत्तमग्गं वा समापन्ना''**ति।

तत्थ **अथा**ति पुच्छारम्भे निपातो। **के चरही**ति के एतरहि। **लोके**ति ओकासलोके। अयञ्हेत्थ अधिप्पायो – भाजनलोकभूते सकलस्मिं जम्बुदीपतले कस्मिं ठाने अरहन्तो वा अरहत्तमग्गं वा समापन्ना एतरहि विहरन्ति, यत्थ मयं ते

उपसङ्कमित्वा तेसं ओवादे ठत्वा वट्टदुक्खतो मुच्चिस्सामाति। **उत्तरेसू**ति सुप्पारकपट्टनतो पुब्बुत्तरदिसाभागं सन्धाय वुत्तं।

अरहन्ति आरकत्ता अरहं। आरका हि सो सब्बकिलेसेहि सुविदूरविदूरे ठितो मग्गेन सवासनानं किलेसानं विद्धंसितत्ता। अरीनं वा हतत्ता अरहं। भगवता हि किलेसारयो अनवसेसतो अरियमग्गेन हता समुच्छिन्नाति। अरानं वा हतत्ता अरहं। यञ्च अविज्जाभवतण्हामयनाभि पुञ्ञादिअभिसङ्खारारं जरामरणनेमि आसवसमुदयमयेन अक्खेन विज्झित्वा तिभवरथे समायोजितं अनादिकालप्पवत्तं संसारचक्कं। तस्सानेन बोधिमण्डे वीरियपादेहि सीलपथवियं पतिट्ठाय सद्धाहत्थेन कम्मक्खयकरञाणफरसुं गहेत्वा सब्बेपि अरा हता विहता विद्धंसिताति। अरहतीति वा अरहं। भगवा हि सदेवके लोके अग्गदक्खिणेय्यत्ता उळारे चीवरादिपच्चये पूजाविसेसञ्च अरहति। रहाभावतो वा अरहं। तथागतो हि सब्बसो समुच्छिन्नरागादिकिलेसत्ता पापकिलेसस्सापि असम्भवतो पापकरणे रहाभावतोपि अरहन्ति वुच्चति।

सम्मा सामञ्च सब्बधम्मानं बुद्धत्ता **सम्मासम्बुद्धो**। भगवा हि अभिञ्ञेय्ये धम्मे अभिञ्ञेय्यतो, परिञ्ञेय्ये धम्मे परिञ्ञेय्यतो, पहातब्बे धम्मे पहातब्बतो, सच्छिकातब्बे धम्मे सच्छिकातब्बतो, भावेतब्बे धम्मे भावेतब्बतो अभिसम्बुज्झि। वुत्तञ्हेतं –

''अभिञ्ञेय्यं अभिञ्ञातं, भावेतब्बञ्च भावितं।
पहातब्बं पहीनं मे, तस्मा बुद्धोस्मि ब्राह्मणा''ति॥ (सु॰ नि॰ ५६३; म॰ नि॰ २.३९९; विसुद्धि॰ १.१३१)।

अपिच कुसले धम्मे अनवज्जसुखविपाकतो, अकुसले धम्मे सावज्जदुक्खविपाकतोतिआदिना सब्बत्तिकदुकादिवसेन अयमत्थो नेतब्बो। इति अविपरीतं सयम्भुञाणेन सब्बाकारतो सब्बधम्मानं अभिसम्बुद्धत्ता सम्मासम्बुद्धोति अयमेत्थ सङ्खेपो। वित्थारो पन विसुद्धिमग्गे (विसुद्धि॰ १.१२९-१३१) आगतनयेनेव वेदितब्बो। **अरहत्ताया**ति अग्गफलप्पटिलाभाय। **धम्मं देसेती**ति आदिकल्याणादिगुणविसेसयुत्तं सीलादिपटिपदाधम्मं समथविपस्सनाधम्ममेव वा वेनेय्यज्झासयानुरूपं उपदिसति कथेति।

संवेजितोति ''धिरत्थु वत, भो, पुथुज्जनभावस्स, येनाहं अनरहाव समानो अरहाति अमञ्ञिं, सम्मासम्बुद्धञ्च लोके उप्पज्जित्वा धम्मं देसेन्तं न जानिं, दुज्जानं खो पनिदं जीवितं, दुज्जानं मरण''न्ति संवेगमापादितो, देवतावचनेन यथावुत्तेनाकारेन संविग्गमानसोति अत्थो। **तावदेवा**ति तस्मिंयेव खणे। **सुप्पारका पक्कामी**ति बुद्धोति नाममपि सवनेन उप्पन्नाय बुद्धारम्मणाय पीतिया संवेगेन च चोदियमानहदयो सुप्पारकपट्टनतो सावत्थिं उद्दिस्स पक्कन्तो। **सब्बत्थ एकरत्तिपरिवासेना**ति सब्बस्मिं मग्गे एकरत्तिवासेनेव अगमासि। सुप्पारकपट्टनतो हि सावत्थि वीसयोजनसते होति, तञ्चायं एत्तकं अद्धानं एकरत्तिवासेन अगमासि। यदा सुप्पारकतो निक्खन्तो, तदहेव सावत्थिं सम्पत्तोति।

कथं पनायं एवं अगमासीति? देवतानुभावेन, ''बुद्धानुभावेना''तिपि वदन्ति। ''सब्बत्थ एकरत्तिपरिवासेना''ति पन वुत्तत्ता मग्गस्स च वीसयोजनसतिकत्ता अन्तरामग्गे गामनिगमराजधानीसु यत्थ यत्थ रत्तियं वसति, तत्थ तत्थ दुतियं अरुणं अनुट्ठापेत्वा सब्बत्थ एकरत्तिवासेनेव सावत्थिं उपसङ्कमीति अयमत्थो दीपितो होतीति। नयिदं एवं दट्ठब्बं। सब्बस्मिं वीसयोजनसतिके मग्गे एकरत्तिवासेनाति इमस्स अत्थस्स अधिप्पेतत्ता। एकरत्तिमत्तं सो सकलस्मिं तस्मिं मग्गे वसित्वा पच्छिमदिवसे पुब्बण्हसमये सावत्थिं अनुप्पत्तोति।

भगवापि बाहियस्स आगमनं ञत्वा ''न तावस्स इन्द्रियानि परिपाकं गतानि, खणन्तरे पन परिपाकं गमिस्सन्ती''ति तस्स इन्द्रियानं परिपाकं आगमयमानो महाभिक्खुसङ्घपरिवुतो तस्मिं खणे सावत्थिं पिण्डाय पाविसि। सो च जेतवनं पविसित्वा भुत्तपातरासे कायालसियविमोचनत्थं अब्भोकासे चङ्कमन्ते सम्बहुले भिक्खू पस्सित्वा ''कहं नु खो एतरहि भगवा''ति पुच्छि। भिक्खू ''भगवा सावत्थिं पिण्डाय पविट्ठो''ति वत्वा पुच्छिंसु ''त्वं पन कुतो आगतो''ति? ''सुप्पारकपट्टनतो आगतोम्ही''ति। ''दूरतो आगतोसि, निसीद, ताव पादे धोवित्वा मक्खेत्वा थोकं विस्समाहि, आगतकाले सत्थारं दक्खसी''ति। ''अहं, भन्ते, अत्तनो जीवितन्तरायं न जानामि, एकरत्तेनेवम्हि कत्थचिपि चिरं अट्ठत्वा अनिसीदित्वा वीसयोजनसतिकं मग्गं आगतो, सत्थारं पस्सित्वाव विस्समिस्सामी''ति वत्वा तरमानरूपो सावत्थिं पविसित्वा अनोपमाय बुद्धसिरिया विरोचमानं भगवन्तं पस्सि। तेन वुत्तं **''तेन खो पन समयेन सम्बहुला भिक्खू अब्भोकासे चङ्कमन्ति। अथ खो बाहियो दारुचीरियो येन ते भिक्खू तेनुपसङ्कमी''**तिआदि।

तत्थ **कह**न्ति कत्थ। **नू**ति संसये, **खो**ति पदपूरणे, कस्मिं नु खो पदेसेति अत्थो। **दस्सनकामम्हा**ति दट्ठुकामा अम्ह। मयञ्हि तं भगवन्तं अन्धो विय चक्खुं, बधिरो विय सोतं, मूगो विय कल्याणवाक्करणं, हत्थपादविकलो विय हत्थपादे, दलिद्दो विय धनसम्पदं, कन्तारद्धानप्पटिपन्नो विय खेमन्तभूमिं, रोगाभिभूतो विय आरोग्यं, महासमुद्दे भिन्ननावो विय महाकुल्लं पस्सितुं उपसङ्कमितुञ्च इच्छामाति दस्सेति। **तरमानरूपो**ति तरमानाकारो।

पासादिकन्ति बात्तिंसमहापुरिसलक्खणअसीतिअनुब्यञ्जनब्यामप्पभाकेतुमालालङ्कताय समन्तपासादिकाय अत्तनो सरीरसोभासम्पत्तिया रूपकायदस्सनब्यावटस्स जनस्स सब्बभागतो पसादावहं। **पसादनीय**न्ति दसबलचतुवेसारज्जछअसाधारणञाणअट्ठारसावेणिक- बुद्धधम्मप्पभुतिअपरिमाणगुणगणसमन्नागताय धम्मकायसम्पत्तिया सरिक्खकजनस्स पसादनीयं पसीदितब्बयुत्तं पसादारहं वा। **सन्तिन्द्रिय**न्ति चक्खादिपञ्चिन्द्रियलोलभावापगमनेन वूपसन्तपञ्चिन्द्रियं। **सन्तमानस**न्ति छट्ठस्स मनिन्द्रियस्स निब्बिसेवनभावूपगमनेन वूपसन्तमानसं। **उत्तमदमथसमथमनुप्पत्त**न्ति लोकुत्तरपञ्ञाविमुत्तिचेतोविमुत्तिसङ्खातं उत्तमं दमथं समथञ्च अनुप्पत्वा अधिगन्त्वा ठितं। **दन्त**न्ति सुपरिसुद्धकायसमाचारताय चेव हत्थपादकुक्कुच्चाभावतो दवादिअभावतो च कायेन दन्तं। **गुत्त**न्ति सुपरिसुद्धवचीसमाचारताय चेव निरत्थकवाचाभावतो दवादिअभावतो च वाचाय गुत्तं। **यतिन्द्रिय**न्ति सुपरिसुद्धमनोसमाचारताय अरियिद्धियोगेन अब्यावटअप्पटिसङ्खानुपेक्खाभावतो च मनिन्द्रियवसेन यतिन्द्रियं। **नाग**न्ति छन्दादिवसेन अगमनतो, पहीनानं रागादिकिलेसानं पुनानागमनतो, कस्सचिपि आगुस्स सब्बथापि अकरणतो, पुनब्भवस्स च अगमनतोति इमेहि कारणेहि नागं। एत्थ च पासादिकन्ति इमिना रूपकायेन भगवतो पमाणभूततं दीपेति, पसादनीयन्ति इमिना धम्मकायेन, सन्तिन्द्रियन्तिआदिना सेसेहि पमाणभूततं दीपेति। तेन चतुप्पमाणिके लोकसन्निवासे अनवसेसतो सत्तानं भगवतो पमाणभावो पकासितोति वेदितब्बो।

एवंभूतञ्च भगवन्तं अन्तरवीथियं गच्छन्तं दिस्वा ''चिरस्सं वत मे सम्मासम्बुद्धो दिट्ठो''ति हट्ठतुट्ठो पञ्चवण्णाय पीतिया निरन्तरं फुटसरीरो पीतिविप्फारितविवटनिच्चललोचनो दिट्ठट्ठानतो पट्ठाय ओणतसरीरो भगवतो सरीरप्पभावेमज्झं अज्झोगाहेत्वा तत्थ निमुज्जन्तो भगवतो समीपं उपसङ्कमित्वा पञ्चपतिट्ठितेन वन्दित्वा भगवतो पादे सम्बाहन्तो परिचुम्बन्तो ''देसेतु मे, भन्ते, भगवा धम्म''न्ति आह। तेन वुत्तं – **''भगवतो पादे सिरसा निपतित्वा भगवन्तं एतदवोच – 'देसेतु मे, भन्ते, भगवा धम्मं, देसेतु सुगतो धम्मं, यं ममस्स दीघरत्तं हिताय सुखाया'''**ति।

तत्थ **सुगतो**ति सोभनगमनत्ता, सुन्दरं ठानं गतत्ता, सम्मा गतत्ता, सम्मा गदत्ता सुगतो। गमनम्पि हि गतन्ति वुच्चति,

तञ्च भगवतो सोभनं परिसुद्धं अनवज्जं। किं पन तन्ति? अरियमग्गो। तेन हेस गमनेन खेमं दिसं असज्जमानो गतो, अञ्ञेपि गमेतीति सोभनगमनत्ता सुगतो। सुन्दरञ्चेस ठानं अमतं निब्बानं गतोति सुन्दरं ठानं गतत्ता सुगतो। सम्मा च गतत्ता सुगतो तेन तेन मग्गेन पहीने किलेसे पुन अपच्चागमनतो। वुत्तञ्हेतं –

''सोतापत्तिमग्गेन ये किलेसा पहीना, ते किलेसे न पुनेति न पच्चेति न पच्चागच्छतीति सुगतो। सकदागामि...पे॰... अरहत्तमग्गेन...पे॰... न पच्चागच्छतीति सुगतो''ति (चूळनि॰ मेत्तगूमाणवपुच्छानिद्देस २७)।

अथ वा सम्मा गतत्ताति तीसुपि अवत्थासु सम्मापटिपत्तिया गतत्ता, सुप्पटिपन्नत्ताति अत्थो। दीपङ्करपादमूलतो हि पट्ठाय याव महाबोधिमण्डा ताव समतिंसपारमिपूरिताय सम्मापटिपत्तिया ञातत्थचरियाय लोकत्थचरियाय बुद्धत्थचरियाय कोटिं पापुणित्वा सब्बलोकस्स हितसुखमेव परिब्रूहन्तो सस्सतं उच्छेदं कामसुखं अत्तकिलमथन्ति इमे अन्ते अनुपगच्छन्तिया अनुत्तराय बोज्झङ्गभावनासङ्खाताय मज्झिमाय पटिपदाय अरियसच्चेसु ततो परं समधिगतधम्माधिपतेय्यो सब्बसत्तेसु अविसयाय सम्मापटिपत्तिया च गतो पटिपन्नोति एवम्पि सम्मा गतत्ता सुगतो। सम्मा चेस गदति युत्तट्ठाने युत्तमेव वाचं भासतीति सुगतो। वुत्तम्पि चेतं –

''कालवादी, भूतवादी, अत्थवादी, धम्मवादी, विनयवादी, निधानवतिं वाचं भासिता कालेन सापदेसं परियन्तवतिं अत्थसंहित''न्ति (दी॰ नि॰ १.९; म॰ नि॰ ३.१४)।

अपरम्पि वुत्तं –

''या सा वाचा अभूता अतच्छा अनत्थसंहिता, या च परेसं अप्पिया अमनापा, न तं तथागतो वाचं भासती''तिआदि (म॰ नि॰ २.८६)।

एवं सम्मा गदत्तापि सुगतो।

यं ममस्स दीघरत्तं हिताय सुखायाति यं धम्मस्स उपदिसनं चिरकालं मम ञाणविमोक्खादिहिताय तदधिगन्तब्बसुखाय च सिया। **अकालो खो ताव बाहिया**ति तव धम्मदेसनाय न ताव कालोति अत्थो। किं पन भगवतो सत्तहितपटिपत्तिया अकालोपि नाम अत्थि, यतो भगवा कालवादीति? वुच्चते – कालोति चेत्थ वेनेय्यानं इन्द्रियपरिपाककालो अधिप्पेतो। यस्मा पन तदा बाहियस्स अत्तनो इन्द्रियानं परिपक्कापरिपक्कभावो दुब्बिञ्ञेय्यो, तस्मा भगवा तं अवत्वा अत्तनो अन्तरवीथियं ठितभावमस्स कारणं अपदिसन्तो आह **''अन्तरघरं पविट्ठम्हा''**ति। **दुज्जान**न्ति दुब्बिञ्ञेय्यं। **जीवितन्तरायान**न्ति जीवितस्स अन्तरायकरधम्मानं वत्तनं अवत्तनं वाति वत्तुकामो सम्भमवसेन ''जीवितन्तरायान''न्ति आह। तथा हि अनेकपच्चयप्पटिबद्धवुत्तिजीवितं अनेकरूपा च तदन्तराया। वुत्तञ्हि –

''अज्जेव किच्चमातप्पं, को जञ्ञा मरणं सुवे।
न हि नो सङ्गरं तेन, महासेनेन मच्चुना''ति॥ (म॰ नि॰ ३.२७२; नेत्ति॰ १०३)।

कस्मा पनायं जीवितन्तरायमेव ताव पुरक्खरोति? ''निमित्तञ्ञुताय अदिट्ठकोसल्लेन वा''ति केचि। अपरे ''देवताय सन्तिके जीवितन्तरायस्स सुतत्ता''ति वदन्ति। अन्तिमभविकत्ता पन उपनिस्सयसम्पत्तिया चोदियमानो एवमाह। न हि तेसं अप्पत्तअरहत्तानं जीवितक्खयो होति। किं पन कारणा भगवा तस्स धम्मं देसेतुकामोव द्विक्खत्तुं पटिक्खिपि? एवं किरस्स

अहोसि ''इमस्स मं दिट्ठकालतो पट्ठाय सकलसरीरं पीतिया निरन्तरं फुटं, अतिबलवा पीतिवेगो, धम्मं सुत्वापि न ताव सक्खिस्सति पटिविज्झितुं। याव पन मज्झत्तुपेक्खा सण्ठाति, ताव तिट्ठतु, वीसयोजनसतं मग्गं आगतत्ता दरथोपिस्स काये बलवा, सोपि ताव पटिप्पस्सम्भतू''ति। तस्मा द्विक्खत्तुं पटिक्खिपि। केचि पन ''धम्मस्सवने आदरजननत्थं भगवा एवमकासी''ति वदन्ति। ततियवारं याचितो पन मज्झत्तुपेक्खं दरथप्पटिपस्सद्धिं पच्चुपट्ठितञ्चस्स जीवितन्तरायं दिस्वा ''इदानि धम्मदेसनाय कालो''ति चिन्तेत्वा **''तस्मा तिहा''**तिआदिना धम्मदेसनं आरभि।

तत्थ **तस्मा**ति यस्मा त्वं उस्सुक्कजातो हुत्वा अतिविय मं याचसि, यस्मा वा जीवितन्तरायानं दुज्जानतं वदसि, इन्द्रियानि च ते परिपाकं गतानि, तस्मा। **तिहा**ति निपातमत्तं। **ते**ति तया **एव**न्ति इदानि वत्तब्बाकारं वदति।

सिक्खितब्बन्ति अधिसीलसिक्खादीनं तिस्सन्नम्पि सिक्खानं वसेन सिक्खनं कातब्बं। यथा पन सिक्खितब्बं, तं दस्सेन्तो **''दिट्ठे दिट्ठमत्तं भविस्सती''**तिआदिमाह।

तत्थ **दिट्ठे दिट्ठमत्त**न्ति रूपायतने चक्खुविञ्ञाणेन दिट्ठमत्तं। यथा हि चक्खुविञ्ञाणं रूपे रूपमत्तमेव पस्सति, न अनिच्चादिसभावं, एवमेव सेसं। चक्खुद्वारिकविञ्ञाणेन हि मे दिट्ठमत्तमेव भविस्सतीति सिक्खितब्बन्ति अत्थो। अथ वा दिट्ठे दिट्ठं नाम चक्खुविञ्ञाणेन रूपविजाननन्ति अत्थो। मत्तन्ति पमाणं। दिट्ठा मत्ता एतस्साति दिट्ठमत्तं, चक्खुविञ्ञाणमत्तमेव चित्तं भविस्सतीति अत्थो। इदं वुत्तं होति – यथा आपाथगते रूपे चक्खुविञ्ञाणं न रज्जति, न दुस्सति, न मुय्हति, एवं रागादिविरहेन चक्खुविञ्ञाणमत्तमेव मे जवनं भविस्सति, चक्खुविञ्ञाणप्पमाणेनेव जवनं ठपेस्सामीति।

अथ वा दिट्ठं नाम चक्खुविञ्ञाणेन दिट्ठं रूपं, दिट्ठमत्तं नाम तत्थेव उप्पन्नं सम्पटिच्छनसन्तीरणवोट्ठब्बनसङ्खातं चित्तत्तयं। यथा तं न रज्जति, न दुस्सति, न मुय्हति, एवं आपाथगते रूपे तेनेव सम्पटिच्छनादिप्पमाणेन जवनं उप्पादेस्सामि, नाहं तं पमाणं अतिक्कमित्वा रज्जनादिवसेन उप्पज्जितुं दस्सामीति एवमेत्थ अत्थो दट्ठब्बो। एसेव नयो सुतमुते। **मुत**न्ति तदारम्मणविञ्ञाणेहि सद्धिं गन्धरसफोट्ठब्बायतनं वेदितब्बं। **विञ्ञाते विञ्ञातमत्त**न्ति एत्थ पन विञ्ञातं नाम मनोद्वारावज्जनेन विञ्ञातारम्मणं। तस्मिं विञ्ञाते विञ्ञातमत्तन्ति आवज्जनप्पमाणं। यथा आवज्जनं न रज्जति, न दुस्सति, न मुय्हति, एवं रज्जनादिवसेन च उप्पज्जितुं अदत्वा आवज्जनप्पमाणेनेव चित्तं ठपेस्सामीति अयमेत्थ अत्थो। **एवञ्हि ते, बाहिय, सिक्खितब्ब**न्ति एवं इमाय पटिपदाय तया, बाहिय, तिस्सन्नं सिक्खानं अनुवत्तनवसेन सिक्खितब्बं।

इति भगवा बाहियस्स संखित्तरुचिताय छहि विञ्ञाणकायेहि सद्धिं छळारम्मणभेदभिन्नं विपस्सनाय विसयं दिट्ठादीहि चतूहि कोट्ठासेहि विभजित्वा तत्थस्स ञाततीरणपरिञ्ञं दस्सेति। कथं? एत्थ हि रूपायतनं पस्सितब्बट्ठेन दिट्ठं नाम, चक्खुविञ्ञाणं पन सद्धिं तंद्वारिकविञ्ञाणेहि दस्सनट्ठेन, तदुभयम्पि यथापच्चयं पवत्तमानं धम्ममत्तमेव, न एत्थ कोचि कत्ता वा कारेता वा, यतो तं हुत्वा अभावट्ठेन अनिच्चं, उदयब्बयप्पटिपीळनट्ठेन दुक्खं, अवसवत्तनट्ठेन अनत्ताति कुतो तत्थ पण्डितस्स रज्जनादीनं ओकासोति? अयमेत्थ अधिप्पायो सुतादीसुपि।

इदानि ञाततीरणपरिञ्ञासु पतिट्ठितस्स उपरि सह मग्गफलेन पहानपरिञ्ञं दस्सेतुं, **''यतो खो ते, बाहिया''**तिआदि आरद्धं। तत्थ **यतो**ति यदा, यस्मा वा। **ते**ति तव। **ततो**ति तदा, तस्मा वा। **तेना**ति तेन दिट्ठादिना, दिट्ठादिपटिबद्धेन रागादिना वा। इदं वुत्तं होति – बाहिय, तव यस्मिं काले येन वा कारणेन दिट्ठादीसु मया वुत्तविधिं पटिपज्जन्तस्स अविपरीतसभावावबोधेन दिट्ठादिमत्तं भविस्सति, तस्मिं काले तेन वा कारणेन दिट्ठादिपटिबद्धेन रागादिना सह न

भविस्ससि, रत्तो वा दुट्ठो वा मूळ्हो वा न भविस्ससि, पहीनरागादिकत्ता तेन वा दिट्ठादिना सह पटिबद्धो न भविस्ससीति। **ततो त्वं, बाहिय, न तत्था**ति यदा यस्मा वा त्वं तेन रागेन वा रत्तो दोसेन वा दुट्ठो मोहेन वा मूळ्हो न भविस्ससि, तदा तस्मा वा त्वं तत्थ दिट्ठादिके न भविस्ससि, तस्मिं दिट्ठे वा सुतमुतविञ्ञाते वा ''एतं मम, एसोहमस्मि, एसो मे अत्ता''ति तण्हामानदिट्ठीहि अल्लीनो पतिट्ठितो न भविस्ससि। एत्तावता पहानपरिञ्ञं मत्थकं पापेत्वा खीणासवभूमि दस्सिता।

ततो त्वं, बाहिय, नेविध न हुरं न उभयमन्तरेनाति यदा त्वं, बाहिय, तेन रागादिना तत्थ दिट्ठादीसु पटिबद्धो न भविस्ससि, तदा त्वं नेव इधलोके न परलोके न उभयत्थापि। **एसेवन्तो दुक्खस्सा**ति किलेसदुक्खस्स च वट्टदुक्खस्स च अयमेव हि अन्तो अयं परिवटुमभावोति अयमेव हि एत्थ अत्थो। ये पन ''उभयमन्तरेना''ति पदं गहेत्वा अन्तराभवं नाम इच्छन्ति, तेसं तं मिच्छा। अन्तराभवस्स हि भावो अभिधम्मे पटिक्खित्तोयेव। अन्तरेनाति वचनं पन विकप्पन्तरदीपनं, तस्मा अयमेत्थ अत्थो – ''नेव इध न हुरं, अपरो विकप्पो न उभय''न्ति।

अथ वा अन्तरेनाति वचनं पन विकप्पन्तराभावदीपनं। तस्सत्थो – ''नेव इध न हुरं, उभयमन्तरे पन न अञ्ञट्ठानं अत्थी''ति। येपि च ''अन्तरापरिनिब्बायी सम्भवेसी''ति च इमेसं सुत्तपदानं अत्थं अयोनिसो गहेत्वा ''अत्थियेव अन्तराभवो''ति वदन्ति, तेपि यस्मा अविहादीसु तत्थ तत्थ आयुवेमज्झं अनतिक्कमित्वा अन्तरा अग्गमग्गाधिगमेन अनवसेसकिलेसपरिनिब्बानेन परिनिब्बायतीति अन्तरापरिनिब्बायी, न अन्तराभवभूतोति पुरिमस्स सुत्तपदस्स अत्थो। पच्छिमस्स च ये भूता एव, न भविस्सन्ति, ते खीणासवा पुरिमपदे भूताति वुत्ता। तब्बिरुद्धताय सम्भवमेसन्तीति सम्भवेसिनो, अप्पहीनभवसंयोजनत्ता सेखा पुथुज्जना च। चतूसु वा योनीसु अण्डजजलाबुजसत्ता याव अण्डकोसं वत्थिकोसञ्च न भिन्दन्ति, ताव सम्भवेसी नाम, अण्डकोसतो वत्थिकोसतो च बहि निक्खन्ता भूता नाम। संसेदजा ओपपातिका च पठमचित्तक्खणे सम्भवेसी नाम, दुतियचित्तक्खणतो पट्ठाय भूता नाम। येन वा इरियापथेन जायन्ति, याव ततो अञ्ञं न पापुणन्ति, ताव सम्भवेसिनो, ततो परं भूताति अत्थो। तस्मा नत्थीति पटिक्खिपितब्बा। सति हि उजुके पाळिअनुगते अत्थे किं अनिद्धारितसामत्थियेन अन्तराभवेन परिकप्पितेन पयोजनन्ति।

ये पन ''सन्तानवसेन पवत्तमानानं धम्मानं अविच्छेदेन देसन्तरेसु पातुभावो दिट्ठो, यथा तं वीहिआदिअविञ्ञाणकसन्ताने, एवं सविञ्ञाणकसन्तानेपि अविच्छेदेन देसन्तरेसु पातुभावेन भवितब्बं। अयञ्च नयो सति अन्तराभवे युज्जति, न अञ्ञथा''ति युत्तिं वदन्ति। तेन हि इद्धिमतो चेतोवसिप्पत्तस्स चित्तानुगतिकं कायं अधिट्ठहन्तस्स खणेन ब्रह्मलोकतो इधूपसङ्कमने इतो वा ब्रह्मलोकगमने युत्ति वत्तब्बा। यदि सब्बत्थेव अविच्छिन्नदेसे धम्मानं पवत्ति इच्छिता, यदिपि सिया इद्धिमन्तानं इद्धिविसयो अचिन्तेय्योति। तं इधापि समानं ''कम्मविपाको अचिन्तेय्यो''ति वचनतो। तस्मा तं तेसं मतिमत्तमेव। अचिन्तेय्यसभावा हि सभावधम्मा, ते कत्थचि पच्चयवसेन विच्छिन्नदेसे पातुभवन्ति, कत्थचि अविच्छिन्नदेसे। तथा हि मुखघोसादीहि पच्चयेहि अञ्ञस्मिं देसे आदासपब्बतप्पदेसादिके पटिबिम्बपटिघोसादिकं पच्चयुप्पन्नं निब्बत्तमानं दिस्सति, तस्मा न सब्बं सब्बत्थ उपनेतब्बन्ति अयमेत्थ सङ्खेपो। वित्थारो पन पटिबिम्बस्स उदाहरणभावसाधनादिको अन्तराभवकथाविचारो कथावत्थुपकरणस्स (कथा० ५०५; कथा० अट्ठ० ५०५) टीकायं गहेतब्बो।

अपरे पन ''**इधा**ति कामभवो, **हुर**न्ति अरूपभवो, **उभयमन्तरेना**ति रूपभवो वुत्तो''ति। अञ्ञे ''**इधा**ति अज्झत्तिकायतनानि, **हुर**न्ति बाहिरायतनानि, **उभयमन्तरेना**ति चित्तचेतसिका''ति। ''**इधा**ति वा पच्चयधम्मा, **हुर**न्ति

पच्चयुप्पन्नधम्मा, **उभयमन्तरेना**ति पण्णत्तिधम्मा वुत्ता''ति वदन्ति। तं सब्बं अट्ठकथासु नत्थि। एवं ताव ''दिट्ठे दिट्ठमत्तं भविस्सती''तिआदिना दिट्ठादिवसेन चतुधा तेभूमकधम्मा सङ्गहेतब्बा। तत्थ सुभसुखनिच्चअत्तग्गाहपरिवज्जनमुखेन असुभदुक्खानिच्चानत्तानुपस्सना दस्सितताति हेट्ठिमाहि विसुद्धीहि सद्धिं सङ्खेपेनेव विपस्सना कथिता। ''ततो त्वं, बाहिय, न तेना''ति इमिना रागादीनं समुच्छेदस्स अधिप्पेतत्ता मग्गो। ''ततो त्वं, बाहिय, न तत्था''ति इमिना फलं। ''नेविधा''तिआदिना अनुपादिसेसा परिनिब्बानधातु कथितााति दट्ठब्बं। तेन वुत्तं – **''अथ खो बाहियस्स...पे०... आसवेहि चित्तं विमुच्ची''**ति।

इमाय संखित्तपदाय देसनाय **तावदेवा**ति तस्मिंयेव खणे, न कालन्तरे। **अनुपादाया**ति अग्गहेत्वा। **आसवेही**ति आभवग्गं आगोत्रभुं सवनतो पवत्तनतो चिरपारिवासियट्ठेन मदिरादिआसवसदिसताय च ''आसवा''ति लद्धनामेहि कामरागादीहि। **विमुच्ची**ति समुच्छेदविमुत्तिया पटिप्पस्सद्धिविमुत्तिया च विमुच्चि निस्सज्जि। सो हि सत्थु धम्मं सुणन्तो एव सीलानि सोधेत्वा यथालद्धं चित्तसमाधिं निस्साय विपस्सनं पट्ठपेत्वा खिप्पाभिञ्ञताय तावदेव सब्बासवे खेपेत्वा सह पटिसम्भिदाहि अरहत्तं पापुणि। सो संसारसोतं छिन्दित्वा कतवट्टपरियन्तो अन्तिमदेहधरो हुत्वा एकूनवीसतिया पच्चवेक्खणासु पवत्तासु धम्मताय चोदियमानो भगवन्तं पब्बज्जं याचि। ''परिपुण्णं ते पत्तचीवर''न्ति पुट्ठो ''न परिपुण्ण''न्ति आह। अथ नं सत्था ''तेन हि पत्तचीवरं परियेसा''ति वत्वा पक्कामि। तेन वुत्तं – **''अथ खो भगवा...पे०... पक्कामी''**ति।

सो किर कस्सपदसबलस्स सासने वीसवस्ससहस्सानि समणधम्मं करोन्तो ''भिक्खुना नाम अत्तना पच्चये लभित्वा यथादानं करोन्तेन अत्तनाव परिभुञ्जितुं वट्टती''ति एकस्स भिक्खुस्सपि पत्तेन वा चीवरेन वा सङ्गहं नाकासि, तेनस्स एहिभिक्खुउपसम्पदाय उपनिस्सयो नाहोसि। केचि पनाहु – ''सो किर बुद्धसुञ्ञे लोके चोरो हुत्वा धनुकलापं सन्नय्हित्वा अरञ्ञे चोरिकं करोन्तो एकं पच्चेकबुद्धं दिस्वा पत्तचीवरलोभेन तं उसुना विज्झित्वा पत्तचीवरं गण्हि, तेनस्स इद्धिमयपत्तचीवरं न उप्पज्जिस्सतीति, सत्था तं ञत्वा एहिभिक्खुभावेन पब्बज्जं न अदासी''ति। तम्पि पत्तचीवरपरियेसनं चरमानं एका धेनु वेगेन आपतन्ती पहरित्वा जीवितक्खयं पापेसि। तं सन्धाय वुत्तं **''अथ खो अचिरपक्कन्तस्स भगवतो बाहियं दारुचीरियं गावी तरुणवच्छा अधिपतित्वा जीविता वोरोपेसी''**ति।

तत्थ **अचिरपक्कन्तस्सा**ति न चिरं पक्कन्तस्स भगवतो। **गावी तरुणवच्छा**ति एका यक्खिनी तरुणवच्छधेनुरूपा। **अधिपतित्वा**ति अभिभवित्वा मद्दित्वा। **जीविता वोरोपेसी**ति पुरिमस्मिं अत्तभावे लद्धाघातताय दिट्ठमत्तेनेव वेरिचित्तं उप्पादेत्वा सिङ्गेन पहरित्वा जीविता वोरोपेसि।

सत्था पिण्डाय चरित्वा कतभत्तकिच्चो सम्बहुलेहि भिक्खूहि सद्धिं नगरतो निक्खमन्तो बाहियस्स सरीरं सङ्कारट्ठाने पतितं दिस्वा भिक्खू आणापेसि – ''भिक्खवे, एकस्मिं घरद्वारे ठत्वा मञ्चकं आहरापेत्वा इदं सरीरं नगरतो नीहरित्वा झापेत्वा थूपं करोथा''ति, भिक्खू तथा अकंसु। कत्वा च पन विहारं गन्त्वा सत्थारं उपसङ्कमित्वा अत्तना कतकिच्चं आरोचेत्वा तस्स अभिसम्परायं पुच्छिंसु। अथ नेसं भगवा तस्स परिनिब्बुतभावं आचिक्खि। भिक्खू ''तुम्हे, भन्ते, 'बाहियो दारुचीरियो अरहत्तं पत्तो'ति वदथ, कदा सो अरहत्तं पत्तो''ति पुच्छिंसु। ''मम धम्मं सुतकाले''ति च वुत्ते ''कदा पनस्स तुम्हेहि धम्मो कथितो''ति? ''पिण्डाय चरन्तेन अज्जेव अन्तरवीथियं ठत्वा''ति। ''अप्पमत्तको सो, भन्ते, तुम्हेहि अन्तरवीथियं ठत्वा कथितधम्मो, कथं सो तावतकेन विसेसं निब्बत्तेसी''ति? ''किं, भिक्खवे, मम धम्मं 'अप्पं वा बहुं वा'ति पमिणथ, अनेकानि गाथासहस्सानिपि अनत्थसंहितानि न सेय्यो, अत्थनिस्सितं पन एकम्पि गाथापदं सेय्यो''ति

दस्सेन्तो –

> ''सहस्समपि चे गाथा, अनत्थपदसञ्हिता।
> एकं गाथापदं सेय्यो, यं सुत्वा उपसम्मती''ति॥ (ध॰ प॰ १०१) –

धम्मपदे इमं गाथं वत्वा ''न केवलं सो परिनिब्बानमत्तेन, अथ खो मम सावकानं भिक्खूनं खिप्पाभिञ्ञानं अग्गभावेनपि पूजारहो''ति दस्सेन्तो ''एतदग्गं, भिक्खवे, मम सावकानं भिक्खूनं खिप्पाभिञ्ञानं, यदिदं बाहियो दारुचीरियो''ति (अ॰ नि॰ १.२१६) तं आयस्मन्तं एतदग्गे ठपेसि। तं सन्धाय वुत्तं – **''अथ खो भगवा सावत्थियं पिण्डाय चरित्वा…पे॰… परिनिब्बुतो, भिक्खवे, बाहियो दारुचीरियो**''ति।

तत्थ **पच्छाभत्त**न्ति भत्तकिच्चतो पच्छा। **पिण्डपातपटिक्कन्तो**ति पिण्डपातपरियेसनतो पटिनिवत्तो। पदद्वयेनापि कतभत्तकिच्चोति वुत्तं होति। **नीहरित्वा**ति नगरतो बहि नेत्वा। **झापेथा**ति दहथ। **थूपञ्चस्स करोथा**ति अस्स बाहियस्स सरीरधातुयो गहेत्वा चेतियञ्च करोथ। तत्थ कारणमाह – **''सब्रह्मचारी वो, भिक्खवे, कालकतो**''ति। तस्सत्थो – यं तुम्हे सेट्ठट्ठेन ब्रह्मं अधिसीलादिपटिपत्तिधम्मं सन्दिट्ठं चरथ, तं सो तुम्हेहि समानं ब्रह्मं अचरीति सब्रह्मचारी मरणकालस्स पत्तियाव कालकतो, तस्मा तं मञ्चकेन नीहरित्वा झापेथ, थूपञ्चस्स करोथाति।

तस्स का गतीति पञ्चसु गतीसु तस्स कतमा गति उपपत्ति भवभूता, **गती**ति निप्फत्ति, अरियो पुथुज्जनो वाति का निट्ठाति अत्थो। **अभिसम्परायो**ति पेच्च भवुप्पत्ति भवनिरोधो वा। किञ्चापि तस्स थूपकरणाणत्तियाव परिनिब्बुतभावो अत्थतो पकासितो होति, ये पन भिक्खू तत्तकेन न जानिंसु, ते ''तस्स का गती''ति पुच्छिंसु। पाकटतरं वा कारापेतुकामा तथा भगवन्तं पुच्छिंसु।

पण्डितोति अग्गमग्गपञ्ञाय अधिगतत्ता पण्डेन इतो गतो पवत्तोति पण्डितो। **पच्चपादी**ति पटिपज्जि। **धम्मस्सा**ति लोकुत्तरधम्मस्स। **अनुधम्म**न्ति सीलविसुद्धिआदिपटिपदाधम्मं। अथ वा **धम्मस्सा**ति निब्बानधम्मस्स। **अनुधम्म**न्ति अरियमग्गफलधम्मं। **न च मं धम्माधिकरण**न्ति धम्मदेसनाहेतु न च मं विहेसेसि यथानुसिट्ठं पटिपन्नत्ता। यो हि सत्थु सन्तिके धम्मं सुत्वा कम्मट्ठानं वा गहेत्वा यथानुसिट्ठं न पटिपज्जति, सो सत्थारं विहेसेति नाम। यं सन्धाय वुत्तं – ''विहिंससञ्ञी पगुणं न भासिं, धम्मं पणीतं मनुजेसु ब्रह्मे''ति (महाव॰ ९; म॰ नि॰ १.२८३; २.३३९)। अथ वा **न च मं धम्माधिकरण**न्ति न च इमं धम्माधिकरणं। इदं वुत्तं होति – वट्टदुक्खतो निय्यानहेतुभूतं इमं मम सासनधम्मं सुप्पटिपन्नत्ता न विहेसेति। दुप्पटिपन्नो हि सासनं भिन्दन्तो सत्थु धम्मसरीरे पहारं देति नाम। अयं पन सम्मापटिपत्तिं मत्थकं पापेत्वा अनुपादिसेसाय निब्बानधातुया परिनिब्बायि। तेन वुत्तं – ''**परिनिब्बुतो, भिक्खवे, बाहियो दारुचीरियो**''ति।

एतमत्थं विदित्वाति एतं थेरस्स बाहियस्स अनुपादिसेसाय निब्बानधातुया परिनिब्बुतभावं, तथा परिनिब्बुतानञ्च खीणासवानं गतिया पचुरजनेहि दुब्बिञ्ञेय्यभावं सब्बाकारतो विदित्वा। **इमं उदान**न्ति इमं अप्पतिट्ठितपरिनिब्बानानुभावदीपकं उदानं उदानेसि।

तत्थ **यत्था**ति यस्मिं निब्बाने आपो च न गाधति, पथवी च तेजो च वायो च न गाधति, न पतिट्ठाति। कस्मा? निब्बानस्स असङ्खतसभावत्ता। न हि तत्थ सङ्खतधम्मानं लेसोपि सम्भवति। **सुक्का**ति सुक्कवण्णताय सुक्काति लद्धनामा गहनक्खत्ततारका। **न जोतन्ती**ति न भासन्ति। **आदिच्चो नप्पकासती**ति तीसु दीपेसु एकस्मिं खणे आलोकफरणसमत्थो

आदिच्चोपि आभावसेन न दिब्बति। **न तत्थ चन्दिमा भाती**ति सतिपि भासुरभावे कन्तसीतलकिरणो चन्दोपि तस्मिं निब्बाने अभावतो एव अत्तनो जुण्हाविभासनेन न विरोचति। यदि तत्थ चन्दिमसूरियादयो नत्थि, लोकन्तरो विय निच्चन्धकारमेव तं भवेय्याति आसङ्कं सन्धायाह **''तमो तत्थ न विज्जती''**ति। सति हि रूपाभावे तमो नाम न सिया।

यदा च अत्तना वेदि, मुनि मोनेन ब्राह्मणोति चतुसच्चमुननतो मोनन्ति लद्धनामेन मग्गञाणेन कायमोनेय्यादीहि च समन्नागतत्ता ''मुनी''ति लद्धनामो अरियसावकब्राह्मणो तेनेव मोनसङ्खातेन पटिवेधञाणेन यदा यस्मिं काले अग्गमग्गक्खणे अत्तना सयमेव अनुस्सवादिके पहाय अत्तपच्चक्खं कत्वा निब्बानं वेदि पटिविज्झि। ''अवेदी''तिपि पाठो, अञ्ञासीति अत्थो। **अथ रूपा अरूपा च, सुखदुक्खा पमुच्चती**ति **अथा**ति तस्स निब्बानस्स जाननतो पच्छा। **रूपा**ति रूपधम्मा, तेन पञ्चवोकारभवो एकवोकारभवो च गहितो होति। **अरूपा**ति अरूपधम्मा, तेन रूपेनामिस्सीकतो अरूपभवो गहितो होति। सो ''चतुवोकारभवो''तिपि वुच्चति। **सुखदुक्खा**ति सब्बत्थ उप्पज्जनकसुखदुक्खतोपि वट्टतो। अथ वा **रूपा**ति रूपलोकपटिसन्धितो। **अरूपा**ति अरूपलोकपटिसन्धितो। **सुखदुक्खा**ति कामावचरपटिसन्धितो। कामभवो हि ब्यामिस्ससुखदुक्खो। एवमेतस्मा सकलतोपि वट्टतो अच्चन्तमेव मुच्चतीति गाथाद्वयेनपि भगवा ''मय्हं पुत्तस्स बाहियस्स एवरूपा निब्बानगती''ति दस्सेति।

दसमसुत्तवण्णना निट्ठिता।

निट्ठिता च बोधिवग्गवण्णना।

२. मुचलिन्दवग्गो

१. मुचलिन्दसुत्तवण्णना

११. मुचलिन्दवग्गस्स पठमे **मुचलिन्दमूले**ति एत्थ मुचलिन्दो वुच्चति नीपरुक्खो। सो ''निचुलो''तिपि वुच्चति, तस्स समीपे। केचि पन ''मुचलोति तस्स रुक्खस्स नामं, तं वनजेट्ठकताय पन मुचलिन्दोति वुत्त''न्ति वदन्ति। **महा अकालमेघो**ति असम्पत्ते वस्सकाले उप्पन्नमहामेघो। सो हि गिम्हानं पच्छिमे मासे सकलचक्कवाळगब्भं पूरेन्तो उदपादि। **सत्ताहवद्दलिका**ति तस्मिं उप्पन्ने सत्ताहं अविच्छिन्नवुट्ठिका अहोसि। **सीतवातदुद्दिनी**ति सा च सत्ताहवद्दलिका उदकफुसितसम्मिस्सेन सीतवातेन समन्ततो परिब्भमन्तेन दुसितदिवसत्ता दुद्दिनी नाम अहोसि। **मुचलिन्दो नाम नागराजा**ति तस्सेव मुचलिन्दरुक्खस्स समीपे पोक्खरणिया हेट्ठा नागभवनं अत्थि, तत्थ निब्बत्तो महानुभावो नागराजा। **सकभवना**ति अत्तनो नागभवनतो। **सत्तक्खत्तुं भोगेहि परिक्खिपित्वा**ति सत्तवारे अत्तनो सरीरभोगेहि भगवतो कायं परिवारेत्वा। **उपरिमुद्धनि महन्तं फणं विहच्चा**ति भगवतो मुद्धप्पदेसस्स उपरि अत्तनो महन्तं फणं पसारेत्वा। ''फणं करित्वा''तिपि पाठो, सो एवत्थो।

तस्स किर नागराजस्स एतदहोसि ''भगवा च मय्हं भवनसमीपे रुक्खमूले निसिन्नो, अयञ्च सत्ताहवद्दलिका वत्तति, वासागारमस्स लद्धुं वट्टती''ति। सो सत्तरतनमयं पासादं निम्मिनितुं सक्कोन्तोपि ''एवं कते कायसारो गहितो न भविस्सति, दसबलस्स कायवेय्यावच्चं करिस्सामी''ति महन्तं अत्तभावं कत्वा सत्थारं सत्तक्खत्तुं भोगेहि परिक्खिपित्वा उपरि फणं कत्वा धारेसि। ''परिक्खेपब्भन्तरं लोहपासादे भण्डागारगब्भप्पमाणं अहोसी''ति खन्धकट्ठकथायं (महाव॰ अट्ठ॰ ५) वुत्तं। मज्झिमट्ठकथायं पन ''हेट्ठालोहपासादप्पमाण''न्ति (म॰ नि॰ अट्ठ॰ १.२८४)। ''इच्छितिच्छितेन इरियापथेन सत्था

विहरिस्सती''ति किर नागराजस्स अज्झासयो। भगवा पन यथानिसिन्नोव सत्ताहं वीतिनामेसि। तञ्च ठानं सुपिहितवातपानं सुफुसितअग्गळद्वारं कूटागारं विय अहोसि। **मा भगवन्तं सीतन्ति**आदि तस्स तथा करित्वा ठानकारणपरिदीपनं। सो हि ''मा भगवन्तं सीतं बाधयित्थ, मा उण्हं, मा डंसादिसम्फस्सो बाधयित्था''ति तथा करित्वा अट्ठासि।

तत्थ किञ्चापि सत्ताहवद्दलिकाय उण्हमेव नत्थि, सचे पन अन्तरन्तरा मेघो विगच्छेय्य, उण्हं भवेय्य, तम्पि मा बाधयित्थाति एवं तस्स चिन्तेतुं युत्तं। केचि पनेत्थ वदन्ति ''उण्हग्गहणं भोगपरिक्खेपस्स विपुलभावकरणे कारणकित्तनं। खुद्दके हि तस्मिं भगवन्तं नागस्स सरीरसम्भूता उस्मा बाधेय्य, विपुलभावकरणेन पन तादिसं 'मा उण्हं बाधयित्था'ति तथा करित्वा अट्ठासी''ति।

विद्धन्ति उब्बिद्धं, मेघविगमेन दूरीभूतन्ति अत्थो। **विगतवलाहकन्ति** अपगतमेघं। **देवन्ति** आकासं। **विदित्वाति** ''इदानि विगतवलाहको आकासो, नत्थि भगवतो सीतादिउपद्दवो''ति ञत्वा। **विनिवेठेत्वाति** अपनेत्वा। **सकवण्णन्ति** अत्तनो नागरूपं। **पटिसंहरित्वाति** अन्तरधापेत्वा। **माणवकवण्णन्ति** कुमारकरूपं।

एतमत्थन्ति विवेकसुखप्पटिसंवेदिनो यत्थ कत्थचि सुखमेव होतीति एतमत्थं सब्बाकारेन जानित्वा। **इमं उदानन्ति** इमं विवेकसुखानुभावदीपकं उदानं उदानेसि।

तत्थ **सुखो विवेकोति** निब्बानसङ्खातो उपधिविवेको सुखो। **तुट्ठस्साति** चतुमग्गञाणसन्तोसेन तुट्ठस्स। **सुतधम्मस्साति** पकासितधम्मस्स विस्सुतधम्मस्स। **पस्सतोति** तं विवेकं, यं वा किञ्चि पस्सितब्बं नाम, तं सब्बं अत्तनो वीरियबलाधिगतेन ञाणचक्खुना पस्सन्तस्स। **अब्यापज्जन्ति** अकुप्पनभावो, एतेन मेत्तापुब्बभागो दस्सितो। **पाणभूतेसु संयमोति** सत्तेसु च संयमो अविहिंसनभावो सुखोति अत्थो। एतेन करुणापुब्बभागो दस्सितो।

सुखा विरागता लोकेति विगतरागतापि लोके सुखा। कीदिसी? **कामानं समतिक्कमोति**, या कामानं समतिक्कमोति वुच्चति, सा विगतरागतापि सुखाति अत्थो, एतेन अनागामिमग्गो कथितो। **अस्मिमानस्स यो विनयोति** इमिना पन अरहत्तं कथितं। अरहत्तञ्हि अस्मिमानस्स पटिप्पस्सद्धिविनयोति वुच्चति, इतो परञ्च सुखं नाम नत्थि, तेनाह **''एतं वे परमं सुख''न्ति**। एवं अरहत्तेन देसनाय कूटं गण्हीति।

पठमसुत्तवण्णना निट्ठिता।

२. राजसुत्तवण्णना

१२. दुतिये **सम्बहुलानन्ति** विनयपरियायेन तयो जना ''सम्बहुला''ति वुच्चन्ति, ततो परं सङ्घो। सुत्तन्तपरियायेन पन तयो तयो एव, ततो उद्धं सम्बहुला। तस्मा इधापि सुत्तन्तपरियायेन सम्बहुलाति वेदितब्बा। **उपट्ठानसालायन्ति** धम्मसभामण्डपे। सा हि धम्मं देसेतुं आगतस्स तथागतस्स भिक्खूनं उपट्ठानकरणट्ठानन्ति ''उपट्ठानसाला''ति वुच्चति। अथ वा यत्थ भिक्खू विनयं विनिच्छिनन्ति, धम्मं कथेन्ति, साकच्छं समापज्जन्ति, सन्निपतनवसेन पकतिया उपतिट्ठन्ति, सा सालापि मण्डपोपि ''उपट्ठानसाला''त्वेव वुच्चति। तत्थापि हि बुद्धासनं निच्चं पञ्ञत्तमेव होति। इदञ्हि बुद्धानं धरमानकाले भिक्खूनं चारित्तं। **सन्निसिन्नानन्ति** निसज्जनवसेन सङ्गम्म निसिन्नानं। **सन्निपतितानन्ति** ततो ततो आगन्त्वा सन्निपतनवसेन सन्निपतितानं। अथ वा बुद्धासनं पुरतो कत्वा सत्थु सम्मुखे विय आदरुप्पत्तिया सक्कच्चं

निसीदनवसेन सन्निसिन्नानं, समानज्झासयत्ता अञ्ञमञ्ञस्मिं अज्झासयेन सुट्ठु सम्मा च निपतनवसेन सन्निपतितानं। **अय**न्ति इदानि वुच्चमानं निद्दिसति। **अन्तराकथा**ति कम्मट्ठानमनसिकारउद्देसपरिपुच्छादीनं अन्तरा अञ्ञा एका कथा, अथ वा मज्झन्हिके लद्धस्स सुगतोवादस्स, सायं लभितब्बस्स धम्मस्सवनस्स च अन्तरा पवत्तत्ता अन्तराकथा, समणसमाचारस्सेव वा अन्तरा पवत्ता अञ्ञा एका कथाति अन्तराकथा। **उदपादी**ति उप्पन्ना।

इमेसं द्विन्नं राजूनन्ति निद्धारणे सामिवचनं। **महद्धनतरो वा**तिआदीसु पथवियं निखणित्वा ठपितं सत्तरतननिचयसङ्खातं महन्तं धनं एतस्साति महद्धनो, द्वीसु अयं अतिसयेन महद्धनोति **महद्धनतरो**। वासद्दो विकप्पत्थो। सेसपदेसुपि एसेव नयो। अयं पन विसेसो – निच्चपरिब्बयवसेन महन्तो भोगो एतस्साति **महाभोगो**। देवसिकं पविसनआयभूतो महन्तो कोसो एतस्साति **महाकोसो**। अपरे पन ''देवसिकं पविसनआयभूतं मणिसारफेग्गुगुम्बादिभेदभिन्नं परिग्गहवत्थु धनं, तदेव सारगब्भादीसु निहितं कोसो''ति वदन्ति। वजिरो, महानीलो, इन्दनीलो, मरकतो, वेळुरियो, पदुमरागो, फुस्सरागो, कक्केतनो, पुलाको, विमलो, लोहितङ्को, फलिको, पवाळो, जोतिरसो, गोमुत्तको, गोमेदको, सोगन्धिको, मुत्ता, सङ्खो, अञ्जनमूलो, राजपट्टो, अमतंसको, पियको, ब्राह्मणी चाति चतुब्बीसति **मणि** नाम। सत्त लोहानि कहापणो च **सारो** नाम। सयनच्छादनपावुरणगजदन्तसिलादीनि **फेग्गु** नाम। चन्दनागरुकुङ्कुमतगरकप्पूरादि **गुम्बा** नाम। तत्थ पुरिमेन आदिसद्देन सालिवीहिआदिमुग्गमासादिपुब्बण्णापरण्णभेदं धञ्ञविकतिं आदिं कत्वा यं सत्तानं उपभोगपरिभोगभूतं वत्थु, तं सब्बं सङ्गण्हति। महन्तं विजितं रट्ठं एतस्साति **महाविजितो**। महन्तो हत्थिअस्सादिवाहनो एतस्साति **महावाहनो**। महन्तं सेनाबलञ्चेव थामबलञ्च एतस्साति **महब्बलो**। इच्छितनिब्बत्तिसङ्खाता पुञ्ञकम्मनिप्फन्ना महती इद्धि एतस्साति **महिद्धिको**। तेजसङ्खातो उस्साहमन्तपभुसत्तिसङ्खातो वा महन्तो आनुभावो एतस्साति **महानुभावो**।

एत्थ च पठमेन आयसम्पदा, दुतियेन वित्तूपकरणसम्पदा, ततियेन विभवसम्पदा, चतुत्थेन जनपदसम्पदा, पञ्चमेन यानसम्पदा, छट्ठेन परिवारसम्पदाय सद्धिं अत्तसम्पदा, सत्तमेन पुञ्ञकम्मसम्पदा, अट्ठमेन पभावसम्पदा तेसं राजूनं पकासिता होति। तेन या सा सामिसम्पत्ति, अमच्चसम्पत्ति, सेनासम्पत्ति, रट्ठसम्पत्ति, विभवसम्पत्ति, मित्तसम्पत्ति, दुग्गसम्पत्तीति सत्त पकतिसम्पदा राजूनं इच्छितब्बा। ता सब्बा यथारहं परिदीपिताति वेदितब्बा।

दानादीहि चतूहि सङ्गहवत्थूहि परिसं रञ्जेतीति **राजा**। मगधानं इस्सरोति **मागधो**। महतिया सेनाय समन्नागतत्ता सेनियगोत्तत्ता वा **सेनियो**। बिम्बि वुच्चति सुवण्णं, तस्मा सारबिम्बिवण्णताय **बिम्बिसारो**। केचि पन ''नाममेवेतं तस्स रञ्ञो''ति वदन्ति। पच्चामित्तं परसेनं जिनातीति **पसेनदि**। कोसलरट्ठस्स अधिपतीति **कोसलो**। **अयञ्चरही**ति एत्थ **चरही**ति निपातमत्तं। **विप्पकता**ति अपरियोसिता। अयं तेसं भिक्खूनं अन्तराकथा अनिट्ठिताति अत्थो।

सायन्हसमयन्ति सायन्हे एकं समयं। **पटिसल्लाना वुट्ठितो**ति ततो ततो रूपादिआरम्मणतो चित्तस्स पटिसंहरणतो पटिसल्लानसङ्खाताय फलसमापत्तितो यथाकालपरिच्छेदं वुट्ठितो। भगवा हि पुब्बण्हसमयं भिक्खुसङ्घपरिवुतो सावत्थिं पविसित्वा भिक्खूनं सुलभपिण्डपातं कत्वा कतभत्तकिच्चो भिक्खूहि सद्धिं सावत्थितो निक्खमित्वा विहारं पविसित्वा गन्धकुटिप्पमुखे ठत्वा वत्तं दस्सेत्वा ठितानं भिक्खूनं यथासमुट्ठितं सुगतोवादं दत्वा तेसु अरञ्ञरुक्खमूलादिदिवाट्ठानं उद्दिस्स गतेसु गन्धकुटिं पविसित्वा फलसमापत्तिसुखेन दिवसभागं वीतिनामेत्वा यथाकालपरिच्छेदे समापत्तितो वुट्ठाय, ''मय्हं उपगमनं आगमयमाना चतस्सो परिसा सकलविहारं परिपूरेन्तियो निसिन्ना, इदानि मे धम्मदेसनत्थं धम्मसभामण्डलं उपगन्तुं कालो''ति आसनतो वुट्ठाय, केसरसीहो विय कञ्चनगुहाय सुरभिगन्धकुटितो निक्खमित्वा यूथं उपसङ्कमन्तो

सम्मादिट्ठिपुरेक्खारोति सम्मासङ्कप्पगोचरताय विधूतमिच्छादस्सनो पुरेतरंयेव कम्मस्सकतालक्खणं, ततो यथाभूतञाणलक्खणञ्च सम्मादिट्ठिं पुरतो कत्वा पुब्बे वुत्तनयेनेव सीलसमाधीसु युत्तो पयुत्तो विपस्सनं आरभित्वा सङ्खारे सम्मसन्तो **ञत्वान उदयब्बयं** पञ्चसु उपादानक्खन्धेसु समपञ्ञासाय आकारेहि उप्पादनिरोधं ववत्थपेत्वा उदयब्बयञाणमधिगन्त्वा ततो परं भङ्गानुपस्सनादिवसेन विपस्सनं उस्सुक्कापेत्वा अनुक्कमेन अरियमग्गं गण्हन्तो अग्गमग्गेन, **थिनमिद्धाभिभू भिक्खु सब्बा दुग्गतियो जहे**ति, एवं सो हेट्ठिममग्गवज्झानं किलेसानं पठममेव पहीनत्ता दिट्ठिविप्पयुत्तलोभसहगतचित्तुप्पादेसु उप्पज्जनकथिनमिद्धानं अधिगतेन अरहत्तमग्गेन समुच्छिन्दनतो तदेकट्ठानं मानादीनम्पि पहीनत्ता सब्बसो भिन्नकिलेसो खीणासवो भिक्खु तिविधदुक्खतायोगेन दुग्गतिसङ्खाता सब्बापि गतियो उच्छिन्नभवमूलत्ता **जहे,** पजहेय्य। तासं परभागे निब्बाने पतिट्ठेय्याति अत्थो।

दुतियसुत्तवण्णना निट्ठिता।

३. गोपालकसुत्तवण्णना

३३. ततिये **कोसलेसू**ति कोसला नाम जानपदिनो राजकुमारा, तेसं निवासो एकोपि जनपदो ''कोसला''त्वेव वुच्चति, तेसु कोसलेसु जनपदे। **चारिकं चरती**ति अतुरितचारिकावसेन जनपदचारिकं चरति। **महता**ति गुणमहत्तेनपि महता, अपरिच्छिन्नसङ्ख्यत्ता सङ्ख्यामहत्तेनपि महता। **भिक्खुसङ्घेना**ति दिट्ठिसीलसामञ्ञसंहतेन समणगणेन। **सद्धि**न्ति एकतो। **मग्गा ओक्कम्मा**ति मग्गतो अपक्कमित्वा। **अञ्ञतरं रुक्खमूल**न्ति घनपत्तसाखाविटपसम्पन्नस्स सन्दच्छायस्स महतो रुक्खस्स समीपसङ्खातं मूलं।

अञ्ञतरो गोपालकोति एको गोगणरक्खको, नामेन पन नन्दो नाम। सो किर अड्ढो महद्धनो महाभोगो, यथा केणियो जटिलो पब्बज्जावसेन, एवं अनाथपिण्डिकस्स गोयूथं रक्खन्तो गोपालकत्तेन राजपीळं अपहरन्तो अत्तनो कुटुम्बं रक्खति। सो कालेन कालं पञ्च गोरसे गहेत्वा, महासेट्ठिस्स सन्तिकं आगन्त्वा निय्यातेत्वा सत्थु सन्तिकं गन्त्वा, सत्थारं पस्सति, धम्मं सुणाति, अत्तनो वसनट्ठानं आगमनत्थाय सत्थारं याचति। सत्था तस्सेव ञाणपरिपाकं आगमयमानो अगन्त्वा, अपरभागे महता भिक्खुसङ्घेन परिवुतो जनपदचारिकं चरन्तो, ''इदानिस्स ञाणं परिपक्क''न्ति ञत्वा तस्स वसनट्ठानस्स अविदूरे मग्गा ओक्कम्म अञ्ञतरस्मिं रुक्खमूले निसीदि तस्स आगमनं आगमयमानो। नन्दोपि खो ''सत्था किर जनपदचारिकं चरन्तो इतो आगच्छती''ति सुत्वा, हट्ठतुट्ठो वेगेन गन्त्वा, सत्थारं उपसङ्कमित्वा वन्दित्वा कतपटिसन्थारो एकमन्तं निसीदि, अथस्स भगवा धम्मं देसेसि। सो सोतापत्तिफले पतिट्ठहित्वा भगवन्तं निमन्तेत्वा सत्ताहं पायासदानमदासि, सत्तमे दिवसे भगवा अनुमोदनं कत्वा पक्कामि। तेन वुत्तं – **''एकमन्तं निसिन्नं खो तं गोपालकं भगवा धम्मिया कथाय सन्दस्सेसि...पे०... उट्ठायासना पक्कामी''**ति।

तत्थ **सन्दस्सेसी**ति ''इमे धम्मा कुसला, इमे धम्मा अकुसला''तिआदिना कुसलादिधम्मे कम्मविपाके इधलोकपरलोके पच्चक्खतो दस्सेन्तो अनुपुब्बिकथावसाने चत्तारि अरियसच्चानि सम्मा दस्सेसि। **समादपेसी**ति ''सच्चाधिगमाय इमे नाम धम्मा अत्तनि उप्पादेतब्बा''ति सीलादिधम्मे सम्मा गण्हापेत्वा तेसु तं पतिट्ठपेसि। **समुत्तेजेसी**ति ते धम्मा समादिन्ना अनुक्कमेन भावियमाना निब्बेधभागिया हुत्वा तिक्खविसदा यथा खिप्पं अरियमग्गं आवहन्ति, तथा सम्मा उत्तेजेसि सम्मदेव तेजेसि। **सम्पहंसेसी**ति भावनाय पुब्बेनापरं विसेसभावदस्सनेन चित्तस्स पमोदापनवसेन सुट्ठु पहंसेसि। अपिचेत्थ सावज्जानवज्जधम्मेसु दुक्खादीसु च सम्मोहविनोदनेन सन्दस्सनं, सम्मापटिपत्तियं पमादापनोदनेन समादपनं, चित्तस्सालसियापत्तिविनोदनेन समुत्तेजनं, सम्मापटिपत्तिसिद्धिया सम्पहंसनं वेदितब्बं। एवं सो भगवतो

सामुक्कंसिकाय धम्मदेसनाय सोतापत्तिफले पतिट्ठहि। **अधिवासेसी**ति तेन दिट्ठसच्चेन ''अधिवासेतु मे, भन्ते भगवा''तिआदिना निमन्तितो कायङ्गवाचङ्गं अचोपेन्तो चित्तेनेव अधिवासेसि सादियि। तेनेवाह **''तुण्हीभावेना''**ति।

अप्पोदकपायासन्ति निरुदकपायासं। **पटियादापेत्वा**ति सम्पादेत्वा सज्जेत्वा। **नवञ्च सप्पि**न्ति नवनीतं गहेत्वा तावदेव विलीनं मण्डसप्पिञ्च पटियादापेत्वा। **सहत्था**ति आदरजातो सहत्थेनेव परिविसन्तो। **सन्तप्पेसी**ति पटियत्तं भोजनं भोजेसि। **सम्पवारेसी**ति ''अलं अल''न्ति वाचाय पटिक्खिपापेसि। **भुत्तावि**न्ति कतभत्तकिच्चं। **ओनीतपत्तपाणि**न्ति पत्ततो अपनीतपाणिं, ''धोतपत्तपाणि''न्तिपि पाठो, धोतपत्तहत्थन्ति अत्थो। **नीच**न्ति अनुच्चं आसनं गहेत्वा आसनेयेव निसीदनं अरियदेसवासीनं चारित्तं, सो पन सत्थु सन्तिके उपचारवसेन पञ्ञत्तस्स दारुफलकासनस्स समीपे निसीदि। **धम्मिया कथाया**तिआदि सत्तमे दिवसे कतं अनुमोदनं सन्धाय वुत्तं। सो किर सत्ताहं भगवन्तं भिक्खुसङ्घञ्च तत्थ वसापेत्वा महादानं पवत्तेसि। सत्तमे पन दिवसे अप्पोदकपायासदानं अदासि। सत्था तस्स तस्मिं अत्तभावे उपरिमग्गत्थाय ञाणपरिपाकाभावतो अनुमोदनमेव कत्वा पक्कामि।

सीमन्तरिकायाति सीमन्तरे, तस्स गामस्स अन्तरं। गामवासिनो किर एकं तळाकं निस्साय तेन सद्धिं कलहं अकंसु। सो ते अभिभवित्वा तं तळाकं गण्हि। तेन बद्धाघातो एको पुरिसो तं सत्थु पत्तं गहेत्वा दूरं अनुगन्त्वा ''निवत्ताहि उपासका''ति वुत्ते भगवन्तं वन्दित्वा पदक्खिणं कत्वा भिक्खुसङ्घस्स च अञ्जलिं कत्वा याव दस्सनूपचारसमतिक्कमा दसनखसमोधानसमुज्जलं अञ्जलिं सिरसि पग्गय्ह पटिनिवत्तित्वा द्विन्नं गामानं अन्तरे अरञ्ञप्पदेसे एककं गच्छन्तं सरेन विज्झित्वा मारेसि। तेन वुत्तं **अचिरपक्कन्तस्स...पे०... वोरोपेसी**''ति। केनचिदेव करणीयेन ओहीयित्वा पच्छा गच्छन्ता भिक्खू तं तथा मतं दिस्वा भगवतो तमत्थं आरोचेसुं, तं सन्धाय वुत्तं **''अथ खो सम्बहुला भिक्खू''**तिआदि।

एतमत्थं विदित्वाति यस्मा दिट्ठिसम्पन्नं अरियसावकं नन्दं मारेन्तेन पुरिसेन आनन्तरियकम्मं बहुलं अपुञ्ञं पसुतं, तस्मा यं चोरेहि च वेरीहि च कत्तब्बं, ततोपि घोरतरं इमेसं सत्तानं मिच्छापणिहितं चित्तं करोतीति इममत्थं जानित्वा तदत्थदीपनं इमं उदानं उदानेसि।

तत्थ **दिसो दिस**न्ति दूसको दूसनीयं चोरो चोरं, दिस्वाति वचनसेसो। **यं तं कयिरा**ति यं तस्स अनयब्यसनं करेय्य, दुतियपदेपि एसेव नयो। इदं वुत्तं होति – एको एकस्स मित्तदुब्भी चोरो पुत्तदारखेत्तवत्थुगोमहिंसादीसु अपरज्झन्तो यस्स अपरज्झति, तम्पि तथेव अत्तनि अपरज्झन्तं चोरं दिस्वा, वेरी वा पन केनचिदेव कारणेन बद्धवेरं वेरिं दिस्वा अत्तनो कक्खळताय दारुणताय यं तस्स अनयब्यसनं करेय्य, पुत्तदारं वा पीळेय्य, खेत्तादीनि वा नासेय्य, जीविता वा वोरोपेय्य, दससु अकुसलकम्मपथेसु मिच्छाठपितत्ता **मिच्छापणिहितं चित्तं पापियो नं ततो करे,** नं पुरिसं पापतरं ततो करेय्य। वुत्तप्पकारो हि दिसो वा वेरी वा दिसस्स वा वेरिनो वा इमस्मिंयेव अत्तभावे दुक्खं वा उप्पादेय्य, जीवितक्खयं वा करेय्य। इदं पन अकुसलकम्मपथेसु मिच्छाठपितं चित्तं दिट्ठेव धम्मे अनयब्यसनं पापेति, अत्तभावसतसहस्सेसुपि चतूसु अपायेसु खिपित्वा सीसमस्स उक्खिपितुं न देतीति।

ततियसुत्तवण्णना निट्ठिता।

४. यक्खपहारसुत्तवण्णना

३४. चतुत्थे **कपोतकन्दराय**न्ति एवंनामके विहारे। तस्मिं किर पब्बतकन्दरे पुब्बे बहू कपोता वसिंसु, तेन सा

पब्बतकन्दरा ''कपोतकन्दरा''ति वुच्चति। अपरभागे तत्थ कतविहारोपि ''कपोतकन्दरा''त्वेव पञ्ञायित्थ। तेन वुत्तं – ''कपोतकन्दरायन्ति एवंनामके विहारे''ति। **जुण्हाय रत्तिया**ति सुक्कपक्खरत्तियं। **नवोरोपितेहि केसेही**ति अचिरओहारितेहि केसेहि, इत्थम्भूतलक्खणे चेतं करणवचनं। **अब्भोकासे**ति यत्थ उपरिच्छदनं परिक्खेपो वा नत्थि, तादिसे आकासङ्गणे।

तत्थ आयस्मा सारिपुत्तो सुवण्णवण्णो, आयस्मा महामोग्गल्लानो नीलुप्पलवण्णो। उभोपि पन ते महाथेरा उदिच्चब्राह्मणजच्चा कप्पानं सतसहस्साधिकं एकं असङ्ख्येय्यं अभिनीहारसम्पन्ना छळभिञ्ञापटिसम्भिदाप्पत्ता महाखीणासवा समापत्तिलाभिनो सत्तसट्ठिया सावकपारमिञाणानं मत्थकप्पत्ता एतं कपोतकन्दरविहारं उपसोभयन्ता एकं कनकगुहं पविट्ठा द्वे सीहा विय, एकं विजम्भनभूमिं ओतिण्णा द्वे ब्यग्घा विय, एकं सुपुप्फितसालवनं पविट्ठा द्वे छद्दन्तनागराजानो विय, एकं सिम्बलिवनं पविट्ठा द्वे सुपण्णराजानो विय, एकं नरवाहनयानं अभिरुळ्हा द्वे वेस्सवणा विय, एकं पण्डुकम्बलसिलासनं अभिनिसिन्ना द्वे सक्का विय, एकविमानब्भन्तरगता द्वे महाब्रह्मानो विय, एकस्मिं गगनट्ठाने ठितानि द्वे चन्दमण्डलानि विय, द्वे सूरियमण्डलानि विय च विरोचिंसु। तेसु आयस्मा महामोग्गल्लानो तुण्ही निसीदि, आयस्मा पन सारिपुत्तो समापज्जि। तेन वुत्तं – **''अञ्ञतरं समाधिं समापज्जित्वा''**ति।

तत्थ **अञ्ञतरं समाधि**न्ति उपेक्खाब्रह्मविहारसमापत्तिं। केचि ''सञ्ञावेदयितनिरोधसमापत्ति''न्ति वदन्ति, अपरे पनाहु ''आरुप्पपादकं फलसमापत्ति''न्ति। इमा एव हि तिस्सो कायरक्खणसमत्था समापत्तियो। तत्थ निरोधसमापत्तिया समाधिपरियायसम्भवो हेट्ठा वुत्तोव, पच्छिमंयेव पन आचरिया वण्णेन्ति। **उत्तराय दिसाय दक्खिणं दिसं गच्छन्ती**ति उत्तराय दिसाय यक्खसमागमं गन्त्वा अत्तनो भवनं गन्तुं दक्खिणं दिसं गच्छन्ति। **पटिभाति म**न्ति उपट्ठाति मम। **म**न्ति हि पटिसद्दयोगेन सामिअत्थे उपयोगवचनं, इमस्स सीसे पहारं दातुं चित्तं मे उप्पज्जतीति अत्थो। सो किर पुरिमजातियं थेरे बद्धाघातो, तेनस्स थेरं दिस्वा पदुट्ठचित्तस्स एवं अहोसि। इतरो पन सप्पञ्ञजातिको, तस्मा तं पटिसेधेन्तो **''अलं सम्मा''**तिआदिमाह। तत्थ **मा आसादेसी**ति मा घट्टेसि, मा पहारं देहीति वुत्तं होति। **उळारो**ति उळारेहि उत्तमेहि सीलादिगुणेहि समन्नागतो।

अनादियित्वाति आदरं अकत्वा, तस्स वचनं अग्गहेत्वा। यस्मा पन तस्स वचनं अग्गण्हन्तो तं अनादियन्तो नाम होति, तस्मा वुत्तं – ''तं यक्खं अनादियित्वा''ति। **सीसे पहारं अदासी**ति सब्बथामेन उस्साहं जनेत्वा आकासे ठितोव सीसे खटकं अदासि, मुद्धनि मुट्ठिघातं अकासीति अत्थो। **ताव महा**ति थाममहत्तेन तत्तकं महन्तो पहारो अहोसि। **तेन पहारेना**ति तेन पहारेन करणभूतेन। **सत्तरतन**न्ति पमाणमज्झिमस्स पुरिसस्स रतनेन सत्तरतनं। **नाग**न्ति हत्थिनागं। **ओसादेय्या**ति पथवियं ओसीदापेय्य निमुज्जापेय्य। ''ओसारेय्या''तिपि पाठो, चुण्णविचुण्णं करेय्याति अत्थो। **अड्ढट्ठमरतन**न्ति अड्ढेन अट्ठन्नं पूरणानि अड्ढट्ठमानि, अड्ढट्ठमानि रतनानि पमाणं एतस्साति अड्ढट्ठमरतनो, तं अड्ढट्ठमरतनं। **महन्तं पब्बतकूट**न्ति केलासकूटप्पमाणं विपुलं गिरिकूटं। **पदालेय्या**ति सकलिकाकारेन भिन्देय्य। अपि ओसादेय्य, अपि पदालेय्याति सम्बन्धो।

तावदेव चस्स सरीरे महापरिळाहो उप्पज्जि, सो वेदनातुरो आकासे ठातुं असक्कोन्तो भूमियं पति, तङ्खणञ्ञेव अट्ठसट्ठिसहस्साधिकयोजनसतसहस्सुब्बेधं सिनेरुम्पि पब्बतराजानं सन्धारेन्ती चतुनहुताधिकद्वियोजनसतसहस्सबहला महापथवी तं पापसत्तं धारेतुं असक्कोन्ती विय विवरमदासि। अवीचितो जाला उट्ठहित्वा कन्दन्तंयेव तं गण्हिंसु, सो कन्दन्तो विप्पलपन्तो पति। तेन वुत्तं – **''अथ च पन सो यक्खो 'डय्हामि डय्हामी'ति वत्वा तत्थेव महानिरयं**

अपतासीति। तत्थ **अपतासी**ति अपति।

किं पन सो यक्खत्तभावेनेव निरयं उपगच्छीति? न उपगच्छि, यञ्हेत्थ दिट्ठधम्मवेदनीयं पापकम्मं अहोसि, तस्स बलेन यक्खत्तभावे महन्तं दुक्खं अनुभवि। यं पन उपपज्जवेदनीयं आनन्तरियकम्मं, तेन चुतिअनन्तरं निरये उप्पज्जीति। थेरस्स पन समापत्तिबलेन उपत्थम्भितसरीरस्स न कोचि विकारो अहोसि। समापत्तितो अवुट्ठितकाले हि तं यक्खो पहरि, तथा पहरन्तं दिब्बचक्खुना दिस्वा आयस्मा महामोग्गल्लानो धम्मसेनापतिं उपसङ्कमि, उपसङ्कमनसमकालमेव च धम्मसेनापति समापत्तितो उट्ठासि। अथ नं महामोग्गल्लानो सरीरवुत्तिं पुच्छि, सोपिस्स ब्याकासि, तेन वुत्तं – **''अद्दसा खो आयस्मा महामोग्गल्लानो...पे०... अपि च मे सीसं थोकं दुक्ख''**न्ति।

तत्थ **थोकं दुक्ख**न्ति थोकं अप्पमत्तकं मधुरकजातं विय मे सीसं दुक्खितं, दुक्खप्पत्तन्ति अत्थो। दुक्खाधिट्ठानञ्हि सीसं दुक्खन्ति वुत्तं। ''सीसे थोकं दुक्ख''न्तिपि पाठो। कथं पन समापत्तिबलेन सरीरे उपत्थम्भिते थेरस्स सीसे थोकम्पि दुक्खं अहोसीति? अचिरेनेव वुट्ठितत्ता। अन्तोसमापत्तियं अपञ्ञायमानदुक्खञ्हि कायनिस्सितत्ता निद्दं उपगतस्स मकसादिजनितं विय पटिबुद्धस्स थोकं पञ्ञायित्थ।

''महाबलेन यक्खेन तथा सब्बुस्साहेन पहटे सरीरेपि विकारो नाम नत्थी''ति अच्छरियब्भुतचित्तजातेन आयस्मता महामोग्गल्लानेन **''अच्छरियं, आवुसो सारिपुत्ता''**तिआदिना धम्मसेनापतिनो महानुभावताय विभाविताय सोपिस्स **'अच्छरियं, आवुसो मोग्गल्लाना''**तिआदिना इद्धानुभावमहन्ततापकासनापदेसेन अत्तनो इस्सामच्छरियाहङ्कारादिमलानं सुप्पहीनतं दीपेति। **पंसुपिसाचकम्पि न पस्सामा**ति सङ्कारकूटादीसु विचरणकखुद्दकपेतम्पि न पस्साम। इति अधिगमप्पिच्छानं अग्गभूतो महाथेरो तस्मिं काले अनावज्जनेन तेसं अदस्सनं सन्धाय वदति। तेनेवाह **''एतरही''**ति।

भगवा पन वेळुवने ठितो उभिन्नं अग्गसावकानं इमं कथासल्लापं दिब्बसोतेन अस्सोसि। तेन वुत्तं – **''अस्सोसि खो भगवा''**तिआदि, तं वुत्तत्थमेव।

एतमत्थं विदित्वाति एतं आयस्मतो सारिपुत्तस्स समापत्तिबलूपगतं इद्धानुभावमहन्ततं विदित्वा। **इमं उदान**न्ति तस्सेव तादिभावप्पत्तिदीपकं इमं उदानं उदानेसि।

तत्थ **यस्स सेलूपमं चित्तं, ठितं नानुपकम्पती**ति यस्स खीणासवस्स चित्तं एकग्घनसिलामयपब्बतूपमं सब्बेसं इञ्जनानं अभावतो वसीभावप्पत्तियाव ठितं सब्बेहिपि लोकधम्मेहि नानुपकम्पति न पवेधति। इदानिस्स अकम्पनाकारं सद्धिं कारणेन दस्सेतुं **''विरत्त''**न्तिआदि वुत्तं। तत्थ **विरत्तं रजनीयेसू**ति विरागसङ्खातेन अरियमग्गेन रजनीयेसु रागुप्पत्तिहेतुभूतेसु सब्बेसु तेभूमकधम्मेसु विरत्तं, तत्थ सब्बसो समुच्छिन्नरागन्ति अत्थो। **कोपनेय्ये**ति पटिघट्ठानीये सब्बस्मिम्पि आघातवत्थुस्मिं **न कुप्पति** न दुस्सति न विकारं आपज्जति। **यस्सेवं भावितं चित्त**न्ति यस्स यथावुत्तस्स अरियपुग्गलस्स चित्तं एवं वुत्तनयेन तादिभावावहनभावेन भावितं। **कुतो तं दुक्खमेस्सती**ति तं उत्तमपुग्गलं कुतो सत्ततो सङ्खारतो वा दुक्खं उपगमिस्सति, न तादिसस्स दुक्खं अत्थीति अत्थो।

चतुत्थसुत्तवण्णना निट्ठिता।

५. नागसुत्तवण्णना

३५. पञ्चमे **कोसम्बियन्**ति कुसुम्बेन नाम इसिना वसितट्ठाने मापितत्ता ''कोसम्बी''ति एवंलद्धनामके नगरे। **घोसितारामे**ति घोसितसेट्ठिना कारिते आरामे। **भगवा आकिण्णो विहरती**ति भगवा सम्बाधप्पत्तो विहरति। किं पन भगवतो सम्बाधो अत्थि, संसग्गो वाति? नत्थि। न हि कोचि भगवन्तं अनिच्छाय उपसङ्कमितुं सक्कोति। दुरासदा हि बुद्धा भगवन्तो सब्बत्थ च अनुपलित्तत्ता। हितेसिताय पन सत्तेसु अनुकम्पं उपादाय ''मुत्तो मोचेस्सामी''ति पटिञ्ञानुरूपं चतुरोघनित्थरणत्थं अट्ठन्नं परिसानं अत्तनो सन्तिकं कालेन कालं उपसङ्कमनं अधिवासेति, सयञ्च महाकरुणासमुस्साहितो कालञ्ञू हुत्वा तत्थ उपसङ्कमति, इदं सब्बबुद्धानं आचिण्णं, अयमिध आकिण्णविहारोति अधिप्पेतो।

इध पन कोसम्बिकानं भिक्खूनं कलहजातानं सत्था दीघीतिस्स कोसलरञ्ञो वत्थुं आहरित्वा, ''न हि वेरेन वेरानि, सम्मन्तीध कुदाचन''न्तिआदिना (ध० प० ५; म० नि० ३.२३७; महाव० ४६४) ओवादं अदासि, तं दिवसं तेसं कलहं करोन्तानंयेव रत्ति विभाता। दुतियदिवसेपि भगवा तमेव वत्थुं कथेसि, तं दिवसम्पि तेसं कलहं करोन्तानंयेव रत्ति विभाता। ततियदिवसेपि भगवा तमेव वत्थुं कथेसि, अथञ्ञतरो भिक्खु भगवन्तं एवमाह – ''अप्पोस्सुक्को, भन्ते भगवा, दिट्ठधम्मसुखविहारमनुयुत्तो विहरतु, मयमेतेन भण्डनेन कलहेन विग्गहेन विवादेन पञ्ञायिस्सामा''ति। सत्था ''परियादिन्नचित्ता खो इमे मोघपुरिसा न दानिमे सक्का सञ्ञापेतुं, नत्थि चेत्थ सञ्ञापेतब्बा, यंनूनाहं एकचारिकवासं वसेय्यं, एवं इमे भिक्खू कलहतो ओरमिस्सन्ती''ति चिन्तेसि। एवं तेहि कलहकारकेहि भिक्खूहि सद्धिं एकविहारे वासं विनेतब्बाभावतो उपासकादीहि उपसङ्कमनञ्च आकिण्णविहारं कत्वा वुत्तं – ''तेन खो पन समयेन भगवा आकिण्णो विहरती''तिआदि।

तत्थ **दुक्खन्**ति न सुखं, अनाराधितचित्तताय न इट्ठन्ति अत्थो। तेनेवाह **''न फासु विहरामी''**ति। **वूपकट्ठो**ति पविवेकट्ठो दूरीभूतो। तथा चिन्तेत्वाव भगवा पातोव सरीरप्पटिजग्गनं कत्वा कोसम्बियं पिण्डाय चरित्वा कञ्चि अनामन्तेत्वा एको अदुतियो गन्त्वा कोसलरट्ठे पालिलेय्यके वनसण्डे भद्दसालमूले विहासि। तेन वुत्तं – **''अथ खो भगवा पुब्बण्हसमयं...पे०... भद्दसालमूले''**ति। तत्थ **सामन्**ति सयं। **संसामेत्वा**ति पटिसामेत्वा। **पत्तचीवरमादाया**ति एत्थापि सामन्ति पदं आनेत्वा योजेतब्बं। **उपट्ठाके**ति कोसम्बिनगरवासिनो घोसितसेट्ठिआदिके उपट्ठाके, विहारे च अग्गुपट्ठाकं आयस्मन्तं आनन्दं अनामन्तेत्वा।

एवं गते सत्थरि पञ्चसता भिक्खू आयस्मन्तं आनन्दं आहंसु – ''आवुसो आनन्द, सत्था एककोव गतो, मयं अनुबन्धिस्सामा''ति। ''आवुसो, यदा भगवा सामं सेनासनं संसामेत्वा पत्तचीवरमादाय अनामन्तेत्वा उपट्ठाके च अनपलोकेत्वा भिक्खुसङ्घं अदुतियो गच्छति, तदा एकचारं चरितुं भगवतो अज्झासयो, सावकेन नाम सत्थु अज्झासयानुरूपं पटिपज्जितब्बं, तस्मा न इमेसु दिवसेसु भगवा अनुगन्तब्बो''ति निवारेसि, सयम्पि नानुगच्छि।

अनुपुब्बेनाति अनुक्कमेन, गामनिगमपटिपाटिया चारिकं चरमानो ''एकचारवासं ताव वसमानं भिक्खुं पस्सिस्सामी''ति बालकलोणकारगामं गन्त्वा तत्थ भगुत्थेरस्स सकलं पच्छाभत्तञ्चेव तियामञ्च रत्तिं एकचारवासे आनिसंसं कथेत्वा पुनदिवसे तेन पच्छासमणेन पिण्डाय चरित्वा तं तत्थेव निवत्तेत्वा ''समग्गवासं वसमाने तयो कुलपुत्ते पस्सिस्सामी''ति पाचीनवंसमिगदायं गन्त्वा तेसम्पि सकलरत्तिं समग्गवासे आनिसंसं कथेत्वा तेपि तत्थेव निवत्तेत्वा एककोव पालिलेय्यगामं सम्पत्तो। पालिलेय्यगामवासिनो पच्चुग्गन्त्वा भगवतो दानं दत्वा पालिलेय्यगामस्स अविदूरे रक्खितवनसण्डो नाम अत्थि, तत्थ भगवतो पण्णसालं कत्वा ''एत्थ भगवा वसतू''ति याचित्वा वासयिंसु। **भद्दसालो**ति

पन तत्थेको मनापो भद्दको सालरुक्खो, भगवा तं गामं उपनिस्साय वनसण्डे पण्णसालसमीपे तस्मिं रुक्खमूले विहासि। तेन वुत्तं – **''पालिलेय्यके विहरति रक्खितवनसण्डे भद्दसालमूले''**ति।

हत्थिनागोति महाहत्थी यूथपति। **हत्थिकलभेही**ति हत्थिपोतकेहि। **हत्थिच्छापेही**ति खीरूपगेहि दहरहत्थिपोतकेहि, ये ''भिङ्का''तिपि वुच्चन्ति। **छिन्नग्गानी**ति पुरतो पुरतो गच्छन्तेहि तेहि हत्थिआदीहि छिन्नग्गानि खादितावसेसानि खाणुसदिसानि खादति। **ओभग्गोभग्ग**न्ति तेन हत्थिनागेन उच्चट्ठानतो भञ्जित्वा भञ्जित्वा पातितं। **अस्स साखाभङ्ग**न्ति एतस्स सन्तकं साखाभङ्गं ते खादन्ति। **आविलानी**ति तेहि पठमतरं ओतरित्वा पिवन्तेहि आलुळितत्ता आविलानि कद्दममिस्सानि पानीयानि पिवति। **ओगाहा**ति तित्थतो। ''ओगाह''न्तिपि पाळि। **अस्सा**ति हत्थिनागस्स। **उपनिघंसन्तियो**ति घट्टेन्तियो, उपनिघंसियमानोपि अत्तनो उळारभावेन न कुज्झति, तेन ता तं घंसन्तियेव। **यूथा**ति हत्थिघटा।

येन भगवा तेनुपसङ्कमीति सो किर हत्थिनागो यूथवासे उक्कण्ठितो तं वनसण्डं पविट्ठो तत्थ भगवन्तं दिस्वा घटसहस्सेन निब्बापितसन्तापो विय निब्बुतो हुत्वा पसन्नचित्तो भगवतो सन्तिके अट्ठासि, ततो पट्ठाय वत्तसीसे ठत्वा भद्दसालस्स पण्णसालाय च समन्ततो अप्पहरितकं कत्वा साखाभङ्गेहि सम्मज्जति, भगवतो मुखधोवनं देति, न्हानोदकं आहरति, दन्तकट्ठं देति, अरञ्ञतो मधुरानि फलानि आहरित्वा सत्थु उपनेति, सत्था तानि परिभुञ्जति। तेन वुत्तं – **''तत्र सुदं सो हत्थिनागो यस्मिं पदेसे भगवा विहरति, तं पदेसं अप्पहरितञ्च करोति, सोण्डाय भगवतो पानीयं परिभोजनीयं उपट्ठापेती''**ति। सोण्डाय दारूनि आहरित्वा अञ्ञमञ्ञं घंसित्वा अग्गिं उट्ठापेत्वा दारूनि जालापेत्वा तत्थ पासाणखण्डानि तापेत्वा तानि दण्डकेहि पवट्टेत्वा सोण्डियं खिपित्वा उदकस्स तत्तभावं ञत्वा भगवतो सन्तिकं उपगन्त्वा तिट्ठति, भगवा ''हत्थिनागो मम न्हानं इच्छती''ति तत्थ गन्त्वा न्हानकिच्चं करोति, पानीयेपि एसेव नयो। तस्मिं पन सीतले सञ्जाते उपसङ्कमति, तं सन्धाय वुत्तं – ''सोण्डाय भगवतो पानीयं परिभोजनीयं उपट्ठापेती''ति।

अथ खो भगवतो रहोगतस्सातिआदि उभिन्नं महानागानं विवेकसुखपच्चवेक्खणदस्सनं, तं वुत्तत्थमेव। **अत्तनो च पविवेकं विदित्वा**ति केहिचि अनाकिण्णभावलद्धं कायविवेकं जानित्वा, इतरे पन विवेका भगवतो सब्बकालं विज्जन्तियेव।

इमं उदानन्ति इमं अत्तनो हत्थिनागस्स च पविवेकाभिरतिया समानज्झासयभावदीपनं उदानं उदानेसि।

तत्थायं सङ्खेपत्थो – **एतं ईसादन्तस्स** रथईसासदिसदन्तस्स हत्थिनागस्स **चित्तं नागेन** बुद्धनागस्स **चित्तेन समेति** संसन्दति। कथं समेति चे? **यदेको रमती वने** यस्मा बुद्धनागो ''अहं खो पुब्बे आकिण्णो विहासि''न्ति पुरिमं आकिण्णविहारं जिगुच्छित्वा विवेकं उपब्रूहयमानो इदानि यथा **एको** अदुतियो **वने** अरञ्ञे **रमति** अभिरमति, एवं अयम्पि हत्थिनागो पुब्बे अत्तनो हत्थिआदीहि आकिण्णविहारं जिगुच्छित्वा विवेकं उपब्रूहयमानो इदानि **एको** असहायो **वने** अरञ्ञे **रमति** अभिरमति। तस्मास्स **चित्तं नागेन समेति** तस्स चित्तेन समेतीति कत्वा एकीभावरतिया एकसदिसं होतीति अत्थो।

पञ्चमसुत्तवण्णना निट्ठिता।

६. पिण्डोलसुत्तवण्णना

३६. छट्ठे **पिण्डोलभारद्वाजो**ति पिण्डं उलमानो परियेसमानो पब्बजितोति पिण्डोलो। सो किर परिजिण्णभोगो

ब्राह्मणो हुत्वा महन्तं भिक्खुसङ्घस्स लाभसक्कारं दिस्वा पिण्डत्थाय निक्खमित्वा पब्बजितो। सो महन्तं कपल्लं ''पत्त''न्ति गहेत्वा चरति, कपल्लपूरं यागुं पिवति, भत्तं भुञ्जति, पूवखज्जकञ्च खादति। अथस्स महग्घसभावं सत्थु आरोचेसुं। सत्था तस्स पत्तत्थविकं नानुजानि, हेट्ठामञ्चे पत्तं निक्कुज्जित्वा ठपेति, सो ठपेन्तोपि घंसेन्तोव पणामेत्वा ठपेति, गण्हन्तोपि घंसेन्तोव आकड्ढित्वा गण्हाति। तं गच्छन्ते गच्छन्ते काले घंसनेन परिक्खीणं, नाळिकोदनमत्तस्सेव गण्हनकं जातं। ततो सत्थु आरोचेसुं, अथस्स सत्था पत्तत्थविकं अनुजानि। थेरो अपरेन समयेन इन्द्रियभावनं भावेन्तो अग्गफले अरहत्ते पतिट्ठासि। इति सो पुब्बे सविसेसं पिण्डत्थाय उलतीति पिण्डोलो, गोत्तेन पन भारद्वाजोति उभयं एकतो कत्वा ''पिण्डोलभारद्वाजो''ति वुच्चति।

आरञ्ञकोति गामन्तसेनासनपटिक्खिपनेन अरञ्ञे निवासो अस्साति आरञ्ञको, आरञ्ञकधुतङ्गं समादाय वत्तन्तस्सेतं नामं। तथा भिक्खासङ्खातानं आमिसपिण्डानं पातो पिण्डपातो, परेहि दिन्नानं पिण्डानं पत्ते निपतनन्ति अत्थो। पिण्डपातं उञ्छति तं तं कुलं उपसङ्कमन्तो गवेसतीति **पिण्डपातिको,** पिण्डाय वा पतितुं चरितुं वतमेतस्साति पिण्डपाती, पिण्डपातीयेव पिण्डपातिको। सङ्कारकूटादीसु पंसूनं उपरि ठितत्ता अब्भुग्गतट्ठेन पंसुकूलं वियाति पंसुकूलं, पंसु विय वा कुच्छितभावं उलति गच्छतीति पंसुकूलं, पंसुकूलस्स धारणं पंसुकूलं, तं सीलं एतस्साति **पंसुकूलिको**। सङ्घाटिउत्तरासङ्गअन्तरवासकसङ्खातानि तीणि चीवरानि तिचीवरं, तिचीवरस्स धारणं तिचीवरं, तं सीलं एतस्साति **तेचीवरिको। अप्पिच्छो**तिआदीनं पदानं अत्थो हेट्ठा वुत्तोयेव।

धुतवादोति **धुतो** वुच्चति धुतकिलेसो पुग्गलो, किलेसधुननकधम्मो वा। तत्थ अत्थि धुतो, न धुतवादो, अत्थि न धुतो, धुतवादो, अत्थि नेव धुतो, न धुतवादो, अत्थि धुतो चेव, धुतवादो चाति इदं चतुक्कं वेदितब्बं। तेसु यो सयं धुतधम्मे समादाय वत्तति, न परं तदत्थाय समादपेति, अयं पठमो। यो पन सयं न धुतधम्मे समादाय वत्तति, परं समादपेति, अयं दुतियो। यो उभयरहितो, अयं ततियो। यो पन उभयसम्पन्नो, अयं चतुत्थो। एवरूपो च आयस्मा पिण्डोलभारद्वाजोति। तेन वुत्तं ''धुतवादो''ति। एकदेससरूपेकसेसवसेन हि अयं निद्देसो यथा तं ''नामरूप''न्ति।

अधिचित्तमनुयुत्तोति एत्थ अट्ठसमापत्तिसम्पयोगतो अरहत्तफलसमापत्तिसम्पयोगतो वा चित्तस्स अधिचित्तभावो वेदितब्बो, इध पन ''अरहत्तफलचित्त''न्ति वदन्ति। तंतंसमापत्तीसु समाधि एव अधिचित्तं, इध पन अरहत्तफलसमाधि वेदितब्बो। केचि पन ''अधिचित्तमनुयुत्तेन, भिक्खवे, भिक्खुना कालेन कालं तीणि निमित्तानि मनसि कातब्बानीति एतस्मिं अधिचित्तसुत्ते (अ० नि० ३.१०३) विय समथविपस्सनाचित्तं अधिचित्तन्ति इधाधिप्पेत''न्ति वदन्ति, तं न सुन्दरं। पुरिमोयेवत्थो गहेतब्बो।

एतमत्थं विदित्वाति एतं आयस्मतो पिण्डोलभारद्वाजस्स अधिट्ठानपरिक्खारसम्पदासम्पन्नं अधिचित्तानुयोगसङ्खातं अत्थं सब्बाकारतो विदित्वा। एवं ''अधिचित्तानुयोगो मम सासनानुट्ठान''न्ति दीपेन्तो **इमं उदानं उदानेसि**।

तत्थ **अनूपवादो**ति वाचाय कस्सचिपि अनुपवदनं। **अनूपघातो**ति कायेन कस्सचि उपघाताकरणं। **पातिमोक्खे**ति एत्थ पातिमोक्खपदस्स अत्थो हेट्ठा नानप्पकारेहि वुत्तो, तस्मिं पातिमोक्खे। सत्तन्नं आपत्तिक्खन्धानं अवीतिक्कमलक्खणो **संवरो। मत्तञ्ञुता**ति पटिग्गहणपरिभोगवसेन पमाणञ्ञुता। **पन्तञ्च सयनासन**न्ति विवित्तं सङ्घट्टनविरहितं सेनासनं। **अधिचित्ते च आयोगो**ति अट्ठन्नं समापत्तीनं अधिगमाय भावनानुयोगो।

अपरो नयो – **अनूपवादो**ति कस्सचिपि उपरुज्झनवचनस्स अवदनं। तेन सब्बम्पि वाचसिकं सीलं सङ्गण्हाति।

अनूपघातोति कायेन कस्सचि उपघातस्स परविहेठनस्स अकरणं। तेन सब्बम्पि कायिकं सीलं सङ्गण्हाति। यादिसं पनिदं उभयं बुद्धानं सासनन्तोगधं होति, तं दस्सेतुं – "**पातिमोक्खे च संवरो**"ति वुत्तं। **च**सद्दो निपातमत्तं। **पातिमोक्खे च संवरो**ति पातिमोक्खसंवरभूतो अनूपवादो अनूपघातो चाति अत्थो।

अथ वा **पातिमोक्खे**ति अधिकरणे भुम्मं। पातिमोक्खे निस्सयभूते संवरो। को पन सोति? अनूपवादो अनूपघातो। उपसम्पदवेलायञ्हि अविसेसेन पातिमोक्खसीलं समादिन्नं नाम होति, तस्मिं पातिमोक्खे ठितस्स ततो परं उपवादूपघातानं अकरणवसेन संवरो, सो अनूपवादो अनूपघातो चाति वुत्तो।

अथ वा **पातिमोक्खे**ति निप्फादेतब्बे भुम्मं यथा "चेतसो अवूपसमो अयोनिसोमनसिकारपदट्ठान"न्ति (सं॰ नि॰ ५.२३२)। तेन पातिमोक्खेन साधेतब्बो अनूपवादो अनूपघातो, पातिमोक्खसंवरसङ्गहितो अनूपवादो अनूपघातोइच्चेव अत्थो। **संवरो**ति इमिना पन सतिसंवरो, ञाणसंवरो, खन्तिसंवरो, वीरियसंवरोति इमेसं चतुन्नं संवरानं गहणं, पातिमोक्खसाधनं इदं संवरचतुक्कं।

मत्तञ्ञुता च भत्तस्मिन्ति परियेसनपटिग्गहणपरिभोगविस्सज्जनानं वसेन भोजने पमाणञ्ञुता। **पन्तञ्च सयनासन**न्ति भावनानुकूलं अरञ्ञरुक्खमूलादिविवित्तसेनासनं। **अधिचित्ते च आयोगो**ति सब्बचित्तानं अधिकत्ता उत्तमत्ता अधिचित्तसङ्खाते अरहत्तफलचित्ते साधेतब्बे तस्स निप्फादनत्थं समथविपस्सनाभावनावसेन आयोगो। **एतं बुद्धान सासन**न्ति एतं परस्स अनूपवदनं, अनूपघातनं, पातिमोक्खसंवरो, परियेसनपटिग्गहणादीसु मत्तञ्ञुता, विवित्तवासो, यथावुत्तअधिचित्तानुयोगो च बुद्धानं सासनं ओवादो अनुसिट्ठीति अत्थो। एवं इमाय गाथाय तिस्सो सिक्खा कथितातिवेदितब्बा।

छट्ठसुत्तवण्णना निट्ठिता।

७. सारिपुत्तसुत्तवण्णना

३७. सत्तमे अपुब्बं नत्थि। गाथाय **अधिचेतसो**ति अधिचित्तवतो, सब्बचित्तानं अधिकेन अरहत्तफलचित्तेन समन्नागतस्साति अत्थो। **अप्पमज्जतो**ति न पमज्जतो, अप्पमादेन अनवज्जधम्मेसु सातच्चकिरियाय समन्नागतस्साति वुत्तं होति। **मुनिनो**ति "यो मुनाति उभो लोके, मुनि तेन पवुच्चती"ति (ध॰ प॰ २६९; चूळनि॰ मेत्तगूमाणवपुच्छानिद्देस २१) एवं उभयलोकमुननेन मोनं वुच्चति ञाणं, तेन अरहत्तफलञाणसङ्खातेन ञाणेन समन्नागतत्ता वा खीणासवो मुनि नाम, तस्स मुनिनो। **मोनपथेसु सिक्खतो**ति अरहत्तञाणसङ्खातस्स मोनस्स पथेसु सत्ततिंसबोधिपक्खियधम्मेसु तीसु वा सिक्खासु सिक्खतो। इदञ्च पुब्बभागप्पटिपदं गहेत्वा वुत्तं। परिनिट्ठितसिक्खो हि अरहा, तस्मा एवं सिक्खतो, इमाय सिक्खाय मुनिभावं पत्तस्स मुनिनोति एवमेत्थ अत्थो दट्ठब्बो। यस्मा च एतदेव, तस्मा हेट्ठिममग्गफलचित्तानं वसेन अधिचेतसो, चतुसच्चसम्बोधपटिपत्तियं अप्पमादवसेन अप्पमज्जतो, मग्गञाणसमन्नागमेन मुनिनोति एवमेतेसं तिण्णं पदानं अत्थो युज्जतियेव। अथ वा "अप्पमज्जतो सिक्खतो"ति पदानं हेतुअत्थता दट्ठब्बा अप्पमज्जनहेतु सिक्खनहेतु च अधिचेतसोति।

सोका न भवन्ति तादिनोति तादिसस्स खीणासवमुनिनो अब्भन्तरे इट्ठवियोगादिवत्थुका सोका चित्तसन्तापा न होन्ति। अथ वा **तादिनो**ति तादिलक्खणसमन्नागतस्स एवरूपस्स मुनिनो सोका न भवन्तीति अयमेत्थ अत्थो।

उपसन्तस्साति रागादीनं अच्चन्तूपसमेन उपसन्तस्स। **सदा सतीमतो**ति सतिवेपुल्लप्पत्तिया निच्चकालं सतिया अविरहितस्स।

एत्थ च ''अधिचेतसो''ति इमिना अधिचित्तसिक्खा, ''अप्पमज्जतो''ति एतेन अधिसीलसिक्खा, ''मुनिनो मोनपथेसु सिक्खतो''ति एतेहि अधिपञ्ञासिक्खा। ''मुनिनो''ति वा एतेन अधिपञ्ञासिक्खा, ''मोनपथेसु सिक्खतो''ति एतेन तासं लोकुत्तरसिक्खानं पुब्बभागपटिपदा, ''सोका न भवन्ती''तिआदीहि सिक्खापारिपूरिया आनिसंसो पकासितोति वेदितब्बं। सेसं वुत्तनयमेव।

सत्तमसुत्तवण्णना निट्ठिता।

८. सुन्दरीसुत्तवण्णना

३८. अट्ठमे **सक्कतो**तिआदीनं पदानं अत्थो हेट्ठा वण्णितोयेव। **असहमाना**ति न सहमाना, उसूयन्ताति अत्थो। भिक्खुसङ्घस्स च सक्कारं असहमानाति सम्बन्धो।

सुन्दरीति तस्सा नामं। सा किर तस्मिं काले सब्बपरिब्बाजिकासु अभिरूपा दस्सनीया पासादिका परमाय वण्णपोक्खरताय समन्नागता, तेनेव सा ''सुन्दरी''ति पञ्ञायित्थ। सा च अनतीतयोब्बना असंयतसमाचाराव होति, तस्मा ते सुन्दरिं परिब्बाजिकं पापकम्मे उय्योजेसुं। ते हि अञ्ञतित्थिया बुद्धुप्पादतो पट्ठाय सयं हतलाभसक्कारा हेट्ठा अक्कोससुत्तवण्णनायं आगतनयेन भगवतो भिक्खुसङ्घस्स च उळारं अपरिमितं लाभसक्कारं पवत्तमानं दिस्वा इस्सापकता एकतो हुत्वा सम्मन्तयिंसु – मयं समणस्स गोतमस्स उप्पन्नकालतो पट्ठाय नट्ठा हतलाभसक्कारा, न नो कोचि अत्थिभावम्पि जानाति, किं निस्साय नु खो लोको समणे गोतमे अभिप्पसन्नो उळारं सक्कारसम्मानं उपनेतीति? तत्थेको आह – ''उच्चाकुलप्पसुतो असम्भिन्नाय महासम्मतप्पवेणिया जातो''ति, अपरो ''अभिजातियं तस्स अनेकानि अच्छरियानि पातुभूतानी''ति, अञ्ञो ''कालदेविलं वन्दापेतुं उपनीतस्स पादा परिवत्तित्वा तस्स जटासु पतिट्ठिता''ति, अपरो ''वप्पमङ्गलकाले जम्बुच्छायाय सयापितस्स वीतिक्कन्तेपि मज्झन्हिके जम्बुच्छाया अपरिवत्तित्वा ठिता''ति, अञ्ञो ''अभिरूपो दस्सनीयो पासादिको रूपसम्पत्तिया''ति, अपरो ''जिण्णातुरमतपब्बजितसङ्खातनिमित्ते दिस्वा संवेगजातो आगामिनं चक्कवत्तिरज्जं पहाय पब्बजितो''ति। एवं अपरिमाणकाले सम्भतं अनञ्ञसाधारणं भगवतो पुञ्ञञाणसम्भारं उक्कंसपारमिप्पत्तं निरुपमं सल्लेखप्पटिपदं अनुत्तरञ्च ञाणपहानसम्पदादिबुद्धानुभावं अजानन्ता अत्तना यथादिट्ठं यथासुतं धरमानं तं तं भगवतो बहुमानकारणं कित्तेत्वा अबहुमानकारणं परियेसित्वा अपस्सन्ता ''केन नु खो कारणेन मयं समणस्स गोतमस्स अयसं उप्पादेत्वा लाभसक्कारं नासेय्यामा''ति। तेसु एको तिखिणमन्ती एवमाह – ''अम्भो इमस्मिं सत्तलोके मातुगामसुखे असत्तसत्ता नाम नत्थि, अयञ्च समणो गोतमो अभिरूपो देवसमो तरुणो, अत्तनो समरूपं मातुगामं लभित्वा सज्जेय्य। अथापि न सज्जेय्य, जनस्स पन सङ्कियो भवेय्य, हन्द मयं सुन्दरिं परिब्बाजिकं तथा उय्योजेम, यथा समणस्स गोतमस्स अयसो पथवियं पत्थरेय्या''ति।

तं सुत्वा इतरे ''इदं सुट्ठु तया चिन्तितं, एवञ्हि कते समणो गोतमो अयसकेन उपद्दुतो सीसं उक्खिपितुं असक्कोन्तो येन वा तेन वा पलायिस्सती''ति सब्बेव एकज्झासया हुत्वा तथा उय्योजेतुं सुन्दरिया सन्तिकं अगमंसु। सा ते दिस्वा ''किं तुम्हे एकतो आगतत्था''ति आह। तित्थिया अनालपन्ता आरामपरियन्ते पटिच्छन्ने ठाने निसीदिंसु। सा तत्थ गन्त्वा पुनप्पुनं आलपन्ती पटिवचनं अलभित्वा किं तुम्हाकं अपरज्झं? कस्मा मे पटिवचनं न देथाति? तथा हि पन त्वं अम्हे

विहेठियमाने अज्झुपेक्खसीति। को तुम्हे विहेठेतीति? ''किं पन त्वं न पस्ससि, समणं गोतमं अम्हे विहेठेत्वा हतलाभसक्कारे कत्वा विचरन्त''न्ति वत्वा ''तत्थ मया किं कातब्ब''न्ति वुत्ते ''तेन हि त्वं अभिक्खणं जेतवनसमीपं गन्त्वा महाजनस्स एवञ्चेवञ्च वदेय्यासी''ति आहंसु। सापि ''साधू''ति सम्पटिच्छि। तेन वुत्तं – **''अञ्ञतित्थिया परिब्बाजका भगवतो सक्कारं असहमाना''**तिआदि।

तत्थ **उस्सहसी**ति सक्कोसि। **अत्थ**न्ति हितं किच्चं वा। **क्याह**न्ति किं अहं। यस्मा ते तित्थिया तस्सा अञ्ञातकापि समाना पब्बज्जसम्बन्धमत्तेन सङ्गण्हितुं ञातका विय हुत्वा **''उस्सहसि त्वं भगिनि ञातीनं अत्थं कातु''**न्ति आहंसु। तस्मा सापि मिगं वल्लि विय पादे लग्गा **जीवितम्पि मे परिच्चत्तं ञातीनं अत्थाया**ति आह।

तेन हीति ''यस्मा त्वं 'जीवितम्पि मे तुम्हाकं अत्थाय परिच्चत्त'न्ति वदसि, त्वञ्च पठमवये ठिता अभिरूपा सोभग्गप्पत्ता च, तस्मा यथा तं निस्साय समणस्स गोतमस्स अयसो उप्पज्जिस्सति, तथा करेय्यासी''ति वत्वा ''अभिक्खणं जेतवनं गच्छाही''ति उय्योजेसुं। सापि खो बाला ककचदन्तपन्तिया पुप्फावलिकीळं कीळितुकामा विय, पभिन्नमदं चण्डहत्थिं सोण्डाय परामसन्ती विय, नलाटेन मच्चुं गण्हन्ती विय तित्थियानं वचनं सम्पटिच्छित्वा मालागन्धविलेपनतम्बूलमुखवासादीनि गहेत्वा महाजनस्स सत्थु धम्मदेसनं सुत्वा नगरं पविसनकाले जेतवनाभिमुखी गच्छन्ती ''कहं गच्छसी''ति च पुट्ठा ''समणस्स गोतमस्स सन्तिकं, अहञ्हि तेन सद्धिं एकगन्धकुटियं वसामी''ति वत्वा अञ्ञतरस्मिं तित्थियारामे वसित्वा पातोव जेतवनमग्गं ओतरित्वा नगराभिमुखी आगच्छन्ती ''किं सुन्दरि कहं गतासी''ति च पुट्ठा ''समणेन गोतमेन सद्धिं एकगन्धकुटियं वसित्वा तं किलेसरतिया रमापेत्वा आगताम्ही''ति वदति। तेन वुत्तं – **''एवं अय्याति खो सुन्दरी परिब्बाजिका तेसं अञ्ञतित्थियानं परिब्बाजकानं पटिस्सुत्वा अभिक्खणं जेतवनं अगमासी''**ति।

तित्थिया कतिपाहस्स अच्चयेन धुत्तानं कहापणे दत्वा ''गच्छथ, सुन्दरिं मारेत्वा समणस्स गोतमस्स गन्धकुटिया अविदूरे मालाकचवरन्तरे निक्खिपित्वा एथा''ति वदिंसु। ते तथा अकंसु। ततो तित्थिया ''सुन्दरिं न पस्सामा''ति कोलाहलं कत्वा रञ्ञो आरोचेत्वा ''कत्थ पन तुम्हे परिसङ्कथा''ति रञ्ञा वुत्ता इमेसु दिवसेसु जेतवने वसति, तत्थस्सा पवत्तिं न जानामाति। ''तेन हि गच्छथ, नं तत्थ विचिनथा''ति रञ्ञा अनुञ्ञाता अत्तनो उपट्ठाके गहेत्वा जेतवनं गन्त्वा विचिनन्ता विय हुत्वा मालाकचवरं ब्यूहित्वा तस्सा सरीरं मञ्चकं आरोपेत्वा नगरं पवेसेत्वा ''समणस्स गोतमस्स सावका 'सत्थुना कतं पापकम्मं पटिच्छादेस्सामा'ति सुन्दरिं मारेत्वा मालाकचवरन्तरे निक्खिपिंसू''ति रञ्ञो आरोचेसुं। राजापि अनुपपरिक्खित्वा ''तेन हि गच्छथ, नगरं आहिण्डथा''ति आह। ते नगरवीथीसु ''पस्सथ समणानं सक्यपुत्तियानं कम्म''न्तिआदीनि वदन्ता विचरित्वा पुन रञ्ञो निवेसनद्वारं अगमंसु। राजा सुन्दरिया सरीरं आमकसुसाने अट्टकं आरोपेत्वा रक्खापेसि। सावत्थिवासिनो ठपेत्वा अरियसावके येभुय्येन ''पस्सथ समणानं सक्यपुत्तियानं कम्म''न्तिआदीनि वत्वा अन्तोनगरे बहिनगरे च भिक्खू अक्कोसन्ता विचरिंसु। तेन वुत्तं – **''यदा ते अञ्ञिंसु तित्थिया परिब्बाजका 'वोदिट्ठा खो सुन्दरी'''**तिआदि।

तत्थ **अञ्ञिंसू**ति जानिंसु। **वोदिट्ठा**ति ब्यपदिट्ठा, जेतवनं आगच्छन्ती च गच्छन्ती च विसेसतो दिट्ठा, बहुलं दिट्ठाति अत्थो। **परिखाकूपे**ति दीघिकावाटे। **या सा, महाराज, सुन्दरी**ति, महाराज, या सा इमस्मिं नगरे रूपसुन्दरताय ''सुन्दरी''ति पाकटा अभिञ्ञाता परिब्बाजिका। **सा नो न दिस्सती**ति सा अम्हाकं चक्खु विय जीवितं विय च पियायितब्बा, इदानि न दिस्सति। **यथानिक्खित्त**न्ति पुरिसे आणापेत्वा मालाकचवरन्तरे अत्तना यथाठपितं।

''यथानिखात''न्तिपि पाठो, पथवियं निखातप्पकारन्ति अत्थो।

रथियाय रथियन्ति वीथितो वीथिं। **वीथी**ति हि विनिविज्झनकरच्छा। **सिङ्घाटकन्**ति तिकोणरच्छा। **अलज्जिनो**ति न लज्जिनो, पापजिगुच्छाविरहिताति अत्थो। **दुस्सीला**ति निस्सीला। **पापधम्मा**ति लामकसभावा निहीनाचारा। **मुसावादिनो**ति दुस्सीला समाना ''सीलवन्तो मय''न्ति अलिकवादिताय मुसावादिनो। **अब्रह्मचारिनो**ति ''मेथुनप्पटिसेविताय असेट्ठचारिनो इमे हि नामा''ति हीळेन्ता वदन्ति। **धम्मचारिनो**ति कुसलधम्मचारिनो। **समचारिनो**ति कायकम्मादिसमचारिनो। **कल्याणधम्मा**ति सुन्दरसभावा, पटिजानिस्सन्ति नामाति सम्बन्धो। नामसद्दयोगेन हि एत्थ पटिजानिस्सन्तीति अनागतकालवचनं। **सामञ्ञन्**ति समणभावो समितपापता। **ब्रह्मञ्ञन्**ति सेट्ठभावो बाहितपापता। **कुतो**ति केन कारणेन। **अपगता**ति अपेता परिभट्ठा। **पुरिसकिच्चन्**ति मेथुनप्पटिसेवनं सन्धाय वदन्ति।

अथ भिक्खू तं पवत्तिं भगवतो आरोचेसुं। सत्था ''तेन हि, भिक्खवे, तुम्हेपि ते मनुस्से इमाय गाथाय पटिचोदेथा''ति वत्वा ''अभूतवादी''ति गाथमाह। तं सन्धाय वुत्तं – **''अथ खो सम्बहुला...पे०... निहीनकम्मा मनुजा परत्था''**ति। तत्थ **नेसो, भिक्खवे, सद्दो चिरं भविस्सती**ति इदं सत्था तस्स अयसस्स निप्फत्तिं सब्बञ्ञुतञ्ञाणेन जानित्वा भिक्खू समस्सासेन्तो आह।

गाथायं **अभूतवादी**ति परस्स दोसं अदिस्वाव मुसावादं कत्वा अभूतेन अतच्छेन परं अब्भाचिक्खन्तो। **यो वापि कत्वा**ति यो वा पन पापकम्मं कत्वा ''नाहं एतं करोमी''ति आह। **पेच्च समा भवन्ती**ति ते उभोपि जना इतो परलोकं गन्त्वा निरयूपगमनेन गतिया समा भवन्ति। गतियेव हि नेसं परिच्छिन्ना, आयू पन अपरिच्छिन्ना। बहुकञ्हि पापं कत्वा चिरं निरये पच्चति, परित्तकं कत्वा अप्पमत्तकमेव कालं पच्चति। यस्मा पन नेसं उभिन्नम्पि लामकमेव कम्मं, तेन वुत्तं – **निहीनकम्मा मनुजा परत्था**ति। ''परत्था''ति इमस्स पन पदस्स पुरतो ''पेच्चा''तिपदेन सम्बन्धो, पेच्च परत्थ इतो गन्त्वा ते निहीनकम्मा परलोके समा भवन्तीति अत्थो।

परियापुणित्वाति उग्गहेत्वा। **अकारका**ति अपराधस्स न कारका। **नयिमेहि कतन्**ति एवं किर नेसमहोसि – इमेहि समणेहि सक्यपुत्तियेहि अद्धा तं पापकम्मं न कतं, यं अञ्ञतित्थिया उग्घोसित्वा सकलनगरं आहिण्डिंसु, यस्मा इमे अम्हेसु एवं असब्भाहि फरुसाहि वाचाहि अब्भाचिक्खन्तेसुपि न किञ्चि विकारं दस्सेन्ति, खन्तिसोरच्चञ्च न विजहन्ति, केवलं पन ''अभूतवादी निरयं उपेती''ति धम्मंयेव वदन्ता सपन्तियेव, इमे समणा सक्यपुत्तिया अम्हे अनुपधारेत्वा अब्भाचिक्खन्ते सपन्ति, सपथं करोन्ता विय वदन्ति। अथ वा ''यो वापि कत्वा 'न करोमि' चाहा''ति वदन्ता सपन्ति, अत्तनो अकारकभावं बोधेतुं अम्हाकं सपथं करोन्ति इमेति अत्थो।

तेसञ्हि मनुस्सानं भगवता भासितगाथाय सवनसमनन्तरमेव बुद्धानुभावेन सारज्जं ओक्कमि, संवेगो उप्पज्जि ''नयिदं अम्हेहि पच्चक्खतो दिट्ठं, सुतं नाम तथापि होति, अञ्ञथापि होति, एते च अञ्ञतित्थिया इमेसं अनत्थकामा अहितकामा, तस्मा ते सद्धाय नयिदं अम्हेहि वत्तब्बं, दुज्जाना हि समणा''ति। ते ततो पट्ठाय ततो ओरमिंसु।

राजापि येहि सुन्दरी मारिता, तेसं जाननत्थं पुरिसे आणापेसि। अथ ते धुत्ता तेहि कहापणेहि सुरं पिवन्ता अञ्ञमञ्ञं कलहं करिंसु। तेसु हि एको एकं आह – ''त्वं सुन्दरिं एकप्पहारेन मारेत्वा मालाकचवरन्तरे खिपित्वा ततो लद्धकहापणेहि सुरं पिवसि, होतु होतू''ति। राजपुरिसा तं सुत्वा ते धुत्ते गहेत्वा रञ्ञो दस्सेसुं। राजा ''तुम्हेहि सा मारिता''ति ते धुत्ते पुच्छि। ''आम, देवा''ति। ''केहि मारापिता''ति? ''अञ्ञतित्थियेहि, देवा''ति। राजा तित्थिये पक्कोसापेत्वा तमत्थं पटिजानापेत्वा,

''अयं सुन्दरी तस्स समणस्स गोतमस्स अवण्णं आरोपेतुकामेहि अम्हेहि मारापिता, नेव गोतमस्स, न गोतमसावकानं दोसो अत्थि, अम्हाकमेव दोसोति एवं वदन्ता नगरं आहिण्डथा''ति आणापेसि। ते तथा अकंसु। महाजनो सम्मदेव सद्दहि। तित्थियानं धिक्कारं अकासि, तित्थिया मनुस्सवधदण्डं पापुणिंसु। ततो पट्ठाय बुद्धस्स भिक्खुसङ्घस्स च भिय्योसोमत्ताय सक्कारसम्मानो महा अहोसि। भिक्खू अच्छरियब्भुतचित्तजाता भगवन्तं अभिवादेत्वा अत्तमना पटिवेदेसुं। तेन वुत्तं – **''अथ खो सम्बहुला भिक्खू...पे०... अन्तरहितो सो, भन्ते, सद्दो''**ति।

कस्मा पन भगवा ''तित्थियानं इदं कम्म''न्ति भिक्खूनं नारोचेसि? अरियानं ताव आरोचनेन पयोजनं नत्थि, पुथुज्जनेसु पन ''ये न सद्दहेय्युं, तेसं तं दीघरत्तं अहिताय दुक्खाय संवत्तेय्या''ति नारोचेसि। अपिचेतं बुद्धानं अनाचिण्णं, यं अनागतस्स ईदिसस्स वत्थुस्स आचिक्खनं। परानुद्देसिकमेव हि भगवा संकिलेसपक्खं विभावेति, कम्मञ्च कतोकासं न सक्का निवत्तेतुन्ति अब्भक्खानं तन्निमित्तञ्च भगवा अज्झुपेक्खन्तो निसीदि। वुत्तञ्हेतं –

''न अन्तलिक्खे न समुद्दमज्झे,
न पब्बतानं विवरं पविस्स।
न विज्जती सो जगतिप्पदेसो,
यत्थट्ठितो मुच्चेय्य पापकम्मा''ति॥ (ध० प० १२७; मि० प० ४.२.४)।

एतमत्थं विदित्वाति मम्मच्छेदनवसेनापि बालजनेहि पवत्तितं दुरुत्तवचनं खन्तिबलसमन्नागतस्स धीरस्स दुत्तितिक्खा नाम नत्थीति इममत्थं सब्बाकारतो विदित्वा। **इमं उदान**न्ति इमं अधिवासनखन्तिबलविभावनं उदानं उदानेसि।

तत्थ **तुदन्ति वाचाय जना असञ्ञता, सरेहि सङ्गामगतंव कुञ्जर**न्ति कायिकसंवरादीसु कस्सचिपि संवरस्स अभावेन असंयता अविनीता बालजना सरेहि सायकेहि सङ्गामगतं युद्धगतं कुञ्जरंव हत्थिनागं पटियोधा विय वाचासत्तीहि तुदन्ति विज्झन्ति, अयं तेसं सभावो। **सुत्वान वाक्यं फरुसं उदीरितं, अधिवासये भिक्खु अदुट्ठचित्तो**ति तं पन तेहि बालजनेहि उदीरितं भासितं मम्मघट्टनवसेन पवत्तितं फरुसं वाक्यं वचनं अभूतं भूततो निब्बेठेन्तो मम ककचूपमओवादं (म० नि० १.२२२ आदयो) अनुस्सरन्तो ईसकम्पि अदुट्ठचित्तो हुत्वा ''संसारसभावो एसो''ति संसारे भयं इक्खणसीलो भिक्खु अधिवासये, अधिवासनखन्तियं ठत्वा खमेय्याति अत्थो।

एत्थाह – किं पन तं कम्मं, यं अपरिमाणकालं सक्कच्चं उपचितविपुलपुञ्ञसम्भारो सत्था एवं दारुणं अभूतब्भक्खानं पापुणीति? वुच्चते – अयं सो भगवा बोधिसत्तभूतो अतीतजातियं मुनाळि नाम धुत्तो हुत्वा पापजनसेवी अयोनिसोमनसिकारबहुलो विचरति। सो एकदिवसं सुरभिं नाम पच्चेकसम्बुद्धं नगरं पिण्डाय पविसितुं चीवरं पारुपन्तं पस्सि। तस्मिञ्च समये अञ्ञतरा इत्थी तस्स अविदूरेन गच्छति। धुत्तो ''अब्रह्मचारी अयं समणो''ति अब्भाचिक्खि। सो तेन कम्मेन बहूनि वस्ससतसहस्सानि निरये पच्चित्वा तस्सेव कम्मस्स विपाकावसेसेन इदानि बुद्धो हुत्वापि सुन्दरिया कारणा अभूतब्भक्खानं पापुणि। यथा चेतं, एवं चिञ्चमाणविकादीनं विकारकित्थीनं भगवतो अब्भक्खानादीनि दुक्खानि पत्तानि, सब्बानि पुब्बे कतस्स कम्मस्स विपाकावसेसानि, यानि ''कम्मपिलोतिकानी''ति वुच्चन्ति। वुत्तञ्हेतं अपदाने (अप० थेर १.३९.६४-९६) –

''अनोतत्तसरासन्ने, रमणीये सिलातले।

नानारतनपज्जोते, नानागन्धवनन्तरे॥

''महता भिक्खुसङ्घेन, परेतो लोकनायको।
आसीनो ब्याकरी तत्थ, पुब्बकम्मानि अत्तनो॥

''सुणाथ भिक्खवो मय्हं, यं कम्मं पकतं मया।
पिलोतिकस्स कम्मस्स, बुद्धत्तेपि विपच्चति॥

१. ''मुनाळि नामहं धुत्तो, पुब्बे अञ्ञासु जातिसु।
पच्चेकबुद्धं सुरभिं, अब्भाचिक्खिं अदूसकं॥

''तेन कम्मविपाकेन, निरये संसरिं चिरं।
बहू वस्ससहस्सानि, दुक्खं वेदेमि वेदनं॥

''तेन कम्मावसेसेन, इध पच्छिमके भवे।
अब्भक्खानं मया लद्धं, सुन्दरिकाय कारणा॥

२. ''सब्बाभिभुस्स बुद्धस्स, नन्दो नामासि सावको।
तं अब्भक्खाय निरये, चिरं संसरितं मया॥

''दस वस्ससहस्सानि, निरये संसरिं चिरं।
मनुस्सभावं लद्धाहं, अब्भक्खानं बहुं लभिं॥

''तेन कम्मावसेसेन, चिञ्चमाणविका ममं।
अब्भाचिक्खि अभूतेन, जनकायस्स अग्गतो॥

३. ''ब्राह्मणो सुतवा आसिं, अहं सक्कतपूजितो।
महावने पञ्चसते, मन्ते वाचेमि माणवे॥

''तत्थागतो इसी भीमो, पञ्चाभिञ्ञो महिद्धिको।
तञ्चाहं आगतं दिस्वा, अब्भाचिक्खिं अदूसकं॥

''ततोहं अवचं सिस्से, कामभोगी अयं इसि।
मय्हम्पि भासमानस्स, अनुमोदिंसु माणवा॥

''ततो माणवका सब्बे, भिक्खमानं कुले कुले।
महाजनस्स आहंसु, कामभोगी अयं इसि॥

''तेन कम्मविपाकेन, पञ्च भिक्खुसता इमे।

अब्भक्खानं लभुं सब्बे, सुन्दरिकाय कारणा॥

४. ''वेमातुभातिकं पुब्बे, धनहेतु हनिं अहं।
पक्खिपिंगिरिदुग्गस्मिं, सिलाय च अपिंसयिं॥

''तेन कम्मविपाकेन, देवदत्तो सिलं खिपि।
अङ्गुट्ठं पिंसयी पादे, मम पासाणसक्खरा॥

५. ''पुरेहं दारको हुत्वा, कीळमानो महापथे।
पच्चेकबुद्धं दिस्वान, मग्गे सकलिकं खिपिं॥

''तेन कम्मविपाकेन, इध पच्छिमके भवे।
वधत्थं मं देवदत्तो, अभिमारे पयोजयि॥

६. ''हत्थारोहो पुरे आसिं, पच्चेकमुनिमुत्तमं।
पिण्डाय विचरन्तं तं, आसादेसिं गजेनहं॥

''तेन कम्मविपाकेन, भन्तो नाळागिरी गजो।
गिरिब्बजे पुरवरे, दारुणो समुपागमि॥

७. ''राजाहं पत्थिवो आसिं, सत्तिया पुरिसे हनिं।
तेन कम्मविपाकेन, निरये पच्चिसं भुसं॥

''कम्मुनो तस्स सेसेन, सोदानि सकलं मम।
पादे छविं पकप्पेसि, न हि कम्मं विनस्सति॥

८. ''अहं केवट्टगामस्मिं, अहुं केवट्टदारको।
मच्छके घातिते दिस्वा, जनयिं सोमनस्सकं॥

''तेन कम्मविपाकेन, सीसदुक्खं अहू मम।
सक्का च सब्बे हञ्ञिंसु, यदा हनि विटटूभो॥

९. ''फुस्सस्साहं पावचने, सावके परिभासयिं।
यवं खादथ भुञ्जथ, मा च भुञ्जथ सालयो॥

''तेन कम्मविपाकेन, तेमासं खादितं यवं।
निमन्तितो ब्राह्मणेन, वेरञ्जायं वसिं तदा॥

१०. ''निब्बुद्धे वत्तमानम्हि, मल्लपुत्तं निहेठयिं।
तेन कम्मविपाकेन, पिट्ठिदुक्खं अहू मम॥

११. ''तिकिच्छको अहं आसिं, सेट्ठिपुत्तं विरेचयिं।
तेन कम्मविपाकेन, होति पक्खन्दिका मम॥

१२. ''अवचाहं जोतिपालो, कस्सपं सुगतं तदा।
कुतो नु बोधि मुण्डस्स, बोधि परमदुल्लभा॥

''तेन कम्मविपाकेन, अचरिं दुक्करं बहुं।
छब्बस्सानुरुवेलायं, ततो बोधिं अपापुणिं॥

''नाहं एतेन मग्गेन, पापुणिं बोधिमुत्तमं।
कुम्मग्गेन गवेसिस्सं, पुब्बकम्मेन वारितो॥

''पुञ्ञपापपरिक्खीणो, सब्बसन्तापवज्जितो।
असोको अनुपायासो, निब्बायिस्समनासवो॥

''एवं जिनो वियाकासि, भिक्खुसङ्घस्स अग्गतो।
सब्बाभिञ्ञाबलप्पत्तो, अनोतत्तमहासरे''ति॥ (अप० थेर १.३९.६४-९६)।

अट्ठमसुत्तवण्णना निट्ठिता।

९. उपसेनसुत्तवण्णना

३९. नवमे **उपसेनस्सा**ति एत्थ **उपसेनो**ति तस्स थेरस्स नामं, वङ्गन्तब्राह्मणस्स पन पुत्तत्ता ''वङ्गन्तपुत्तो''ति च नं वोहरन्ति।

अयञ्हि थेरो आयस्मतो सारिपुत्तस्स कनिट्ठभाता, सासने पब्बजित्वा अपञ्ञत्ते सिक्खापदे उपसम्पदाय द्विवस्सो उपज्झायो हुत्वा एकं भिक्खुं उपसम्पादेत्वा तेन सद्धिं भगवतो उपट्ठानं गतो, तस्स भिक्खुनो भगवता तस्स सद्धिविहारिकभावं पुच्छित्वा खन्धके आगतनयेन ''अतिलहुं खो त्वं, मोघपुरिस, आवत्तो बाहुल्लाय, यदिदं गणबन्धिय''न्ति (महाव० ७५) विगरहितो पतोदाभितुन्नो विय आजानीयो संविग्गमानसो ''यदिपाहं इदानि परिसं निस्साय भगवता विगरहितो, परिसंयेव पन निस्साय पासंसियो भवेय्य''न्ति उस्साहजातो सब्बे धुतधम्मे समादाय वत्तमानो विपस्सनं आरभित्वा न चिरस्सेव छळभिञ्ञो पटिसम्भिदाप्पत्तो महाखीणासवो हुत्वा अत्तनो निस्सितके धुतङ्गधरे एव कत्वा तेहि सद्धिं भगवन्तं उपसङ्कमित्वा सन्थतसिक्खापदे (पारा० ५६५ आदयो) आगतनयेन ''पासादिका खो त्यायं, उपसेन, परिसा''ति परिसवसेन भगवतो सन्तिका लद्धपसंसो ''एतदग्गं, भिक्खवे, मम सावकानं भिक्खूनं समन्तपासादिकानं यदिदं उपसेनो वङ्गन्तपुत्तो''ति (अ० नि० १.२१३) एतदग्गे ठपितो असीतिया महासावकेसु अब्भन्तरो।

सो एकदिवसं पच्छाभत्तं पिण्डपातप्पटिक्कन्तो अन्तेवासिकेसु अत्तनो अत्तनो दिवाट्ठानं गतेसु उदककुम्भतो उदकं गहेत्वा पादे पक्खालेत्वा गत्तानि सीतिं कत्वा चम्मक्खण्डं अत्थरित्वा दिवाट्ठाने दिवाविहारं निसिन्नो अत्तनो गुणे आवज्जेसि। तस्स ते अनेकसता अनेकसहस्सा पोङ्खानुपोङ्खं उपट्ठहिंसु। सो ''मय्हं ताव सावकस्स सतो इमे एवरूपा गुणा, कीदिसा नु खो मय्हं सत्थु गुणा''ति भगवतो गुणाभिमुखं मनसिकारं पेसेसि। ते तस्स ञाणबलानुरूपं अनेककोटिसहस्सा उपट्ठहिंसु। सो ''एवंसीलो मे सत्था एवंधम्मो एवंपञ्ञो एवंविमुत्ती''तिआदिना च ''इतिपि सो भगवा अरहं सम्मासम्बुद्धो''तिआदिना च आविभावानुरूपं सत्थु गुणे अनुस्सरित्वा, ततो ''स्वाक्खातो''तिआदिना धम्मस्स, ''सुप्पटिपन्नो''तिआदिना अरियसङ्घस्स च गुणे अनुस्सरि। एवं महाथेरो अनेकाकारवोकारं रतनत्तयगुणेसु आविभूतेसु अत्तमनो पमुदितो उळारपीतिसोमनस्सं पटिसंवेदेन्तो निसीदि। तमत्थं दस्सेतुं **''आयस्मतो उपसेनस्स वङ्गन्तपुत्तस्स रहोगतस्सा''**तिआदि वुत्तं।

तत्थ **रहोगतस्सा**ति रहसि गतस्स। **पटिसल्लीनस्सा**ति एकीभूतस्स। **एवं चेतसो परिवितक्को उदपादी**ति एवं इदानि वुच्चमानाकारो चित्तस्स वितक्को उप्पज्जि। **लाभा वत मे**ति ये इमे मनुस्सत्तबुद्धुप्पादसद्धासमधिगमादयो, अहो वत मे एते लाभा। **सुलद्धं वत मे**ति यञ्चिदं मया भगवतो सासने पब्बज्जूपसम्पदारतनत्तयपयिरुपासनादि पटिलद्धं, तं मे अहो वत सुट्ठु लद्धं। तत्थ कारणमाह **''सत्था च मे''**तिआदिना।

तत्थ दिट्ठधम्मिकसम्परायिकपरमत्थेहि यथारहं सत्ते अनुसासतीति **सत्था**। भाग्यवन्ततादीहि कारणेहि **भगवा**। आरकत्ता किलेसेहि, किलेसारीनं हतत्ता, संसारचक्कस्स वा अरानं हतत्ता, पच्चयादीनं अरहत्ता, पापकरणे रहाभावा **अरहं**। सम्मा सामञ्च सब्बधम्मानं बुद्धत्ता **सम्मासम्बुद्धो**ति अयमेत्थ सङ्खेपो, वित्थारो पन विसुद्धिमग्गे (विसुद्धि० १.१२३ आदयो) बुद्धानुस्सतिनिद्देसतो गहेतब्बो।

स्वाक्खातेति सुट्ठु अक्खाते, एकन्तनिय्यानिकं कत्वा भासिते। **धम्मविनये**ति पावचने। तञ्हि यथानुसिट्ठं पटिपज्जमानानं संसारदुक्खपाततो धारणेन, रागादिकिलेसे विनयनेन च धम्मविनयोति वुच्चति। **सब्रह्मचारिनो**ति सेट्ठट्ठेन ब्रह्मसङ्खातं भगवतो सासनं अरियमग्गं सह चरन्ति पटिपज्जन्तीति सब्रह्मचारिनो। **सीलवन्तो**ति मग्गफलसीलवसेन सीलवन्तो। **कल्याणधम्मा**ति समाधिपञ्ञाविमुत्तिविमुत्तिञाणदस्सनादयो कल्याणा सुन्दरा धम्मा एतेसं अत्थीति कल्याणधम्मा। एतेन सङ्घस्स सुप्पटिपत्तिं दस्सेति। **सीलेसु चम्हि परिपूरकारी**ति ''अहम्पि पब्बजित्वा न तिरच्छानकथाकथिको कायदळ्हिबहुलो हुत्वा विहासिं, अथ खो पातिमोक्खसंवरादिं चतुब्बिधम्पि सीलं अखण्डं अछिद्दं असबलं अकम्मासं भुजिस्सं विञ्ञुप्पसत्थं अपरामट्ठं कत्वा परिपूरेन्तो अरियमग्गंयेव पापेसि''न्ति वदति। एतेन हेट्ठिमफलद्वयसम्पत्तिमत्तनो दीपेति। सोतापन्नसकदागामिनो हि सीलेसु परिपूरकारिनो। **सुसमाहितो चम्हि एकग्गचित्तो**ति उपचारप्पनाभेदेन समाधिना सब्बथापि समाहितो च अम्हि अविक्खित्तचित्तो। इमिना समाधिस्मिं परिपूरकारितावचनेन ततियफलसम्पत्तिमत्तनो दीपेति। अनागामिनो हि समाधिस्मिं परिपूरकारिनो। **अरहा चम्हि खीणासवो**ति कामासवादीनं सब्बसो खीणत्ता खीणासवो, ततो एव परिक्खीणभवसंयोजनो सदेवके लोके अग्गदक्खिणेय्यताय अरहा चम्हि। एतेन अत्तनो कतकरणीयतं दस्सेति। **महिद्धिको चम्हि महानुभावो**ति अधिट्ठानविकुब्बनादिइद्धीसु महता वसीभावेन समन्नागतत्ता महिद्धिको उळारस्स पुञ्ञानुभावस्स गुणानुभावस्स च सम्पत्तिया महानुभावो च अस्मि। एतेन लोकियाभिञ्ञानवानुपुब्बविहारसमापत्तियोगमत्तनो दीपेति। अभिञ्ञासु वसीभावेन हि अरिया यथिच्छितनिप्फादनेन महिद्धिका, पुब्बूपनिस्सयसम्पत्तिया नानाविहारसमापत्तीहि च विसोधितसन्तानत्ता महानुभावा च होन्तीति।

भद्दकं मे जीवितन्ति एवंविधसीलादिगुणसमन्नागतस्स मे यावायं कायो धरति, ताव सत्तानं हितसुखमेव वड्ढति, पुञ्ञक्खेत्तभावतो जीवितम्पि मे भद्दकं सुन्दरं। **भद्दकं मरण**न्ति सचे पनिदं खन्धपञ्चकं अज्ज वा इमस्मिंयेव वा खणे अनुपादानो विय जातवेदो निब्बायति, तं अप्पटिसन्धिकं परिनिब्बानसङ्खातं मरणम्पि मे भद्दकन्ति उभयत्थ तादिभावं दीपेति। एवं महाथेरो अप्पहीनसोमनस्सुप्पिलावितवासनुस्सन्नत्ता उळारसोमनस्सितो धम्मबहुमानेन धम्मपीतिपटिसंवेदनेन परिवितक्केसि।

तं सत्था गन्धकुटियं निसिन्नोव सब्बञ्ञुतञ्ञाणेन जानित्वा जीविते मरणे च तस्स तादिभावविभावनं इमं उदानं उदानेसि। तेन वुत्तं – **''अथ खो भगवा...पे०... उदानेसी''**ति।

तत्थ **यं जीवितं न तपती**ति यं खीणासवपुग्गलं जीवितं आयतिं खन्धप्पवत्तिया सब्बेन सब्बं अभावतो न तपति न बाधति, वत्तमानमेव वा जीवितं सब्बसो सङ्खतधम्मत्ता सतिपञ्ञावेपुल्लप्पत्तिया सब्बत्थ सतिसम्पजञ्ञसमायोगतो न बाधति। यो हि अन्धपुथुज्जनो पापजनसेवी अयोनिसोमनसिकारबहुलो अकतकुसलो अकतपुञ्ञो, सो ''अकतं वत मे कल्याण''न्तिआदिना विप्पटिसारेन तपतीति तस्स जीवितं तं तपति नाम। इतरे पन अकतपापा कतपुञ्ञा कल्याणपुथुज्जनेन सद्धिं सत्त सेखा तपनीयधम्मपरिवज्जनेन अतपनीयधम्मसमन्नागमेन च पच्छानुतापेन न तपन्तीति न तेसं जीवितं तपति। खीणासवे पन वत्तब्बमेव नत्थीति पवत्तिदुक्खवसेन अत्थवण्णना कता।

मरणन्ते न सोचतीति मरणसङ्खाते अन्ते परियोसाने, मरणसमीपे वा न सोचति अनागामिमग्गेनेव सोकस्स समुग्घातितत्ता। **स वे दिट्ठपदो धीरो, सोकमज्झे न सोचती**ति सो अनभिज्झादीनं चतुन्नं धम्मपदानं निब्बानस्सेव वा दिट्ठत्ता दिट्ठपदो, धितिसम्पन्नत्ता धीरो खीणासवो सोचनधम्मत्ता ''सोका''ति लद्धनामानं अवीतरागानं सत्तानं, सोकहेतूनं वा लोकधम्मानं मज्झे ठत्वापि न सोचति।

इदानिस्स सब्बसो सोकहेतूनं अभावं दीपेतुं **''उच्छिन्नभवतण्हस्सा''**तिआदिमाह। तत्थ यस्स अग्गमग्गेन सब्बसो उच्छिन्ना भवतण्हा, सो उच्छिन्नभवतण्हो। तस्स अवसेसकिलेसानं अनवसेसवूपसमेन सन्तचित्तस्स खीणासवभिक्खुनो। **विक्खीणो जातिसंसारो**ति जातिआदिको –

''खन्धानञ्च पटिपाटि, धातुआयतनान च।
अब्बोच्छिन्नं वत्तमाना, 'संसारो'ति पवुच्चती''ति॥ –

वुत्तलक्खणो संसारो विसेसतो खीणो। तस्मा **नत्थि तस्स पुनब्भवो**ति यस्मा तस्स एवरूपस्स अरियपुग्गलस्स आयतिं पुनब्भवो नत्थि, तस्मा तस्स जातिसंसारो खीणो। कस्मा पनस्स पुनब्भवो नत्थि? यस्मा उच्छिन्नभवतण्हो सन्तचित्तो च होति, तस्माति आवत्तेत्वा वत्तब्बं। अथ वा विक्खीणो जातिसंसारो, ततो एव नत्थि तस्स पुनब्भवोति अत्थो योजेतब्बो।

नवमसुत्तवण्णना निट्ठिता।

१०. सारिपुत्तउपसमसुत्तवण्णना

४०. दसमे **अत्तनो उपसम**न्ति सावकपारमीमत्थकप्पत्तिया हेतुभूतं अग्गमग्गेन अत्तनो अनवसेसकिलेसवूपसमं।

आयस्मा हि सारिपुत्तो अनुपसन्तकिलेसानं सत्तानं रागादिकिलेसजनितसन्तापदरथपरिळाहदुक्खञ्चेव किलेसाभिसङ्खारनिमित्तं जातिजराब्याधिमरणसोकपरिदेवादिदुक्खञ्च पच्चक्खतो दिस्वा अतीतानागतेपि नेसं वट्टमूलकदुक्खं परितुलेत्वा करुणायमानो अत्तनापि पुथुज्जनकाले अनुभूतं किलेसनिमित्तं वा अनप्पकं दुक्खं अनुस्सरित्वा ''ईदिसस्स नाम महादुक्खस्स हेतुभूता किलेसा इदानि मे सुप्पहीना''ति अत्तनो किलेसवूपसमं अभिण्हं पच्चवेक्खति। पच्चवेक्खन्तो च ''इमे एत्तका किलेसा सोतापत्तिमग्गेन उपसमिता, एत्तका सकदागामिमग्गेन, एत्तका अनागामिमग्गेन, एत्तका अरहत्तमग्गेन उपसमिता''ति तंतंमग्गञाणेहि ओधिसो किलेसानं उपसमितभावं पच्चवेक्खति, तेन वुत्तं – **''अत्तनो उपसमं पच्चवेक्खमानो''**ति।

अपरे ''थेरो अरहत्तफलसमापत्तिं समापज्जित्वा तं पच्चवेक्खित्वा 'इमस्स वतायं सन्तपणीतभावो अच्चन्तसन्ताय असङ्खताय धातुया आरम्मणतो, सयञ्च सम्मदेव किलेसवूपसमतो'ति एवं अभिण्हं उपसमं पच्चवेक्खती''ति वदन्ति। अञ्ञे पन ''अनवसेसकिलेसानं उपसमपरियोसाने जातं अग्गफलमेवेत्थ उपसमो नाम, तं पच्चवेक्खमानो निसिन्नो''ति।

एतमत्थं विदित्वाति यदिदं आयस्मतो सारिपुत्तस्स महापञ्ञतादिहेतुभूतं सावकेसु अनञ्ञसाधारणं किलेसप्पहानं अग्गफलं वा उपसमपरियायेन वुत्तं, तस्स पच्चवेक्खणसङ्खातं अत्थं सब्बाकारतो विदित्वा तदनुभावदीपकं **इमं उदानं उदानेसि**।

तत्थ **उपसन्तसन्तचित्तस्सा**ति उपसन्तमेव हुत्वा सन्तं चित्तं एतस्साति उपसन्तसन्तचित्तो। समापत्तिया विक्खम्भनेन हि उपसन्तकिलेसत्ता उपसन्तचित्तं न सब्बथा ''उपसन्तसन्त''न्ति वुच्चति तस्स उपसमस्स अनच्चन्तिकभावतो, न तथा अग्गमग्गेन। तेन पन अच्चन्तमेव किलेसानं समुच्छिन्नत्ता अरहतो चित्तं पुन किलेसानं अनुपसमेतब्बताय समथविपस्सनाहेट्ठिममग्गेहि उपसन्तकिलेसं हुत्वा अच्चन्तसन्तभावतोव ''उपसन्तसन्त''न्ति वुच्चति। तेन वुत्तं – ''उपसन्तमेव हुत्वा सन्तं चित्तं एतस्साति उपसन्तसन्तचित्तो''ति। **उपसन्त**न्ति वा उपसमो वुच्चति, तस्मा ''उपसन्तसन्तचित्तस्सा''ति अच्चन्तूपसमेन सन्तचित्तस्साति अत्थो।

अथ वा सतिपि सब्बेसं खीणासवानं अनवसेसकिलेसवूपसमे सावकपारमीञाणस्स पन मत्थकप्पत्तिहेतुभूतो सावकेसु अनञ्ञसाधारणो सविसेसो धम्मसेनापतिनो किलेसवूपसमोति दस्सेतुं सत्था उपसन्तसद्देन विसेसेत्वा आह ''उपसन्तसन्तचित्तस्सा''ति।

तत्रायमत्थो – भुसं दळ्हं वा सन्तं उपसन्तं, तेन उपसन्तेन उपसन्तमेव हुत्वा सन्तं उपसन्तसन्तं, तादिसं चित्तं एतस्साति सब्बं पुरिमसदिसमेव। तथा हेस भगवता – ''सारिपुत्तो, भिक्खवे, महापञ्ञो पुथुपञ्ञो हासपञ्ञो जवनपञ्ञो तिक्खपञ्ञो निब्बेधिकपञ्ञो''तिआदिना (म॰ नि॰ ३.९३) अनेकपरियायेन वण्णितो थोमितो। **नेत्तिच्छिन्नस्सा**ति नेत्ति वुच्चति भवतण्हा संसारस्स नयनतो, सा नेत्ति छिन्ना एतस्साति नेत्तिच्छिन्नो। तस्स नेत्तिच्छिन्नस्स, पहीनतण्हस्साति अत्थो। **मुत्तो सो मारबन्धना**ति सो एवंविधो परिक्खीणभवसंयोजनो सब्बस्मा मारबन्धनतो मुत्तो, न तस्स मारबन्धनमोचनाय करणीयं अत्थि, तस्मा धम्मसेनापति अत्तनो उपसमं पच्चवेक्खतीति। सेसं वुत्तनयमेव।

दसमसुत्तवण्णना निट्ठिता।

निट्ठिता च मेघियवग्गवण्णना।

५. सोणवग्गो

१. पियतरसुत्तवण्णना

४१. महावग्गस्स पठमे **मल्लिकाय देविया सद्धिन्ति** मल्लिकाय नाम अत्तनो महेसिया सह। **उपरिपासादवरगतो**ति पासादवरस्स उपरि गतो। **कोचञ्ञो अत्तना पियतरो**ति कोचि अञ्ञो अत्तना पियायितब्बतरो। **अत्थि नु खो ते**ति ''किं ते अत्थी''ति देविं पुच्छति।

कस्मा पुच्छति? अयञ्हि सावत्थियं दुग्गतमालाकारस्स धीता। एकदिवसं आपणतो पूवं गहेत्वा मालारामं गन्त्वा ''खादिस्सामी''ति गच्छन्ती पटिपथे भिक्खुसङ्घपरिवुतं भगवन्तं भिक्खाचारं पविसन्तं दिस्वा पसन्नचित्ता तं भगवतो अदासि। सत्था तथारूपे ठाने निसीदनाकारं दस्सेसि। आनन्दत्थेरो चीवरं पञ्ञापेत्वा अदासि। भगवा तत्थ निसीदित्वा तं पूवं परिभुञ्जित्वा मुखं विक्खालेत्वा सितं पात्वाकासि। थेरो ''को इमिस्सा, भन्ते, दानस्स विपाको भविस्सती''ति पुच्छि। ''अज्जेसा, आनन्द, तथागतस्स पठमं भोजनं अदासि, अज्जेव कोसलरञ्ञो अग्गमहेसी भविस्सति पिया मनापा''ति। तं दिवसमेव च राजा कासिगामे भागिनेय्येन सद्धिं युज्झित्वा पराजितो पलायित्वा आगतो नगरं पविसन्तो ''बलकायस्स आगमनं आगमेस्सामी''ति तं मालारामं पाविसि। सा राजानं आगतं पस्सित्वा तस्स वत्तमकासि। राजा तस्सा वत्ते पसीदित्वा पितरं पक्कोसापेत्वा महन्तं इस्सरियं दत्वा तं अन्तेपुरं पटिहरापेत्वा अग्गमहेसिट्ठाने ठपेसि। अथेकदिवसं राजा चिन्तेसि – ''मया इमिस्सा महन्तं इस्सरियं दिन्नं, यंनूनाहं इमं पुच्छेय्यं 'को ते पियो'ति? सा 'त्वं मे, महाराज, पियो'ति वत्वा, पुन मं पुच्छिस्सति, अथस्साहं 'मय्हम्पि त्वंयेव पिया'ति वक्खामी''ति। इति सो अञ्ञमञ्ञं विस्सासजननत्थं सम्मोदनीयं करोन्तो पुच्छि।

देवी पन पण्डिता बुद्धुपट्ठायिका सङ्घुपट्ठायिका ''नायं पञ्हो रञ्ञो मुखं उल्लोकेत्वा कथेतब्बो''ति चिन्तेत्वा यथाभूतमेव वदन्ती **''नत्थि खो मे, महाराज, कोचञ्ञो अत्तना पियतरो''**ति आह। वत्वापि अत्तना ब्याकतमत्थं उपायेन रञ्ञो पच्चक्खं कातुकामा **''तुय्हं पन, महाराज, अत्थञ्ञो कोचि अत्तना पियतरो''**ति तथेव राजानं पुच्छि यथा रञ्ञा सयं पुट्ठा। राजापि ताय सरसलक्खणेन कथितत्ता निवत्तितुं असक्कोन्तो सयम्पि सरसलक्खणेनेव कथेन्तो तथेव ब्याकासि यथा देविया ब्याकतं।

